ISSN2249-698X

।। श्रीशः ।।

# भारती

## संस्कृत-मासपत्रिका

संस्थापकौ
स्व. उमाकान्तकेशवआप्टे ( बाबा साहब आप्टे )
स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

संरक्षकाः

श्रीश्यामशरणदेवाचार्यः

स्वामी रामभद्राचार्यः

स्वामी अवधेशानन्दगिरिः

स्वामी राघवाचार्यवेदान्ती

आर्थिकपरामर्शदाता -
दामोदरप्रसादमोदी

व्यवस्थापकः
राजीवदाधीचः
9352030291

सम्पादकमण्डलम्

प्रधानसम्पादकः
देवर्षिकलानाथशास्त्री

सम्पादकः
प्रो. श्रीकृष्णशर्मा

प्रबन्धसम्पादकः
सुदामाशर्मा

सहसम्पादकौ
प्रो. सुरेन्द्रकुमारशर्मा
शिवशरणनाथत्रिपाठी

सदस्याः
प्रो. धर्मचन्दजैनः
डॉ. स्नेहलताशर्मा
डॉ. पवनव्यासः

भारतीयसंस्कृतप्रचारसंस्थानम्

उपाध्यक्षौ - डॉ. नाथूलालसुमनः, डॉ. नन्दसिंहनरूकाः, सचिवः - डॉ. सुधीरकुमारशर्मा, सहसचिवः -कृष्णकुमारशर्मा

कार्यालयः
बी-15, भारतीभवनम्
न्यू कॉलोनी, जयपुरम् ( राज. )
ई-मेल sanskritbharti09@gmail.com

वर्षम् 70 अङ्कः -3
पौषमासः
विक्रमाब्दः 2076
जनवरी, 2020

एकस्याः प्रतेः 15/-
वार्षिकशुल्कम् 120/-
पञ्चवार्षिकशुल्कम् 500/-
आजीवनसदस्यताशुल्कम् 1500/- रूप्यकाणि

सम्पादकीयम्

# मातृवत् परदारेषु

...✍ प्रोफेसर श्रीकृष्णशर्मा

**'मातृवत् परदारेषु परद्रव्येषु लोष्ठवत्।**
**आत्मवत् सर्वभूतेषु यः पश्यति स पण्डितः।।'**

इत्याद्यस्ति भारतीयसंस्कृतेरुद्घोषः। परमेतद्-विपरीतं जातं हैदराबादनगरे नवम्बरमासे। तत्र 27.11.2019 दिनाङ्के रात्रौ प्रायेण नववादने पशूनां चिकित्सया प्रियं कर्तुकामया पशुचिकित्सक-डॉ. दिशया (काल्पनिक-नाम्न्या) सह सुरापैः नृपशुभिश्च-तुर्भिर्बलात्कारिभिः सामूहिकं दुष्कर्म आचरितम्, इतोऽप्यधिकं यत् तस्याः मृतशरीरमपि तैर्गृध्रैर्लुञ्चितम्, अन्ते च सा धिक्कृत्यै-र्निर्लज्जैस्तैः प्रज्वालिता। किन्ते मानवाः? नहि, नहि, मनुष्यरूपेण गृध्राश्चरन्ति भूमौ। धिक् तान्।

04.12.2019 दिनाङ्के न्यायालयेन राजपुरुषावेक्षणे (In the police custody) ते नृपशवः समर्पिताः। 6.12.19 दिनाङ्के ब्राह्मे मुहूर्त्ते तेऽपराधिनो विहिता-पराधस्य पुनः प्रकल्पितसाक्षात्काराय (To recreate the crime scene) दुष्कर्मघटनास्थलमानीता राजपुरुषैः। तदानीमकस्मादेव राजपुरुषहस्तेभ्य आयुधानि सहसाऽऽकलय्य राजपुरुषेषु प्रहारं कुर्वाणाः पलायितुमारब्धाः। आत्मरक्षार्थं राजपुरुषायुक्तस्य बी.सी. सज्जारस्य नेतृत्वेऽपराधिनस्ते सर्वेऽपि सङ्घर्षे मृत्युंगताः। अनेन 'शठे शाठ्यं समाचरेद्' इत्युक्तिरप्यन्वर्थिका जाता। समग्रे राष्ट्रे प्रजाजनाः सम्प्रहृष्टाः सन्तो राजपुरुषान् सममानयन्। न्यायनये कृत्यमिदमुचितमनुचितमिति तु भवतु नामान्वेषणविषयः। परं प्रजाजनैर्मतं यज्जघन्या-पराधस्याविलम्बेन सन्निर्णयः सञ्जातः। कथमेतादृशः सीमातीतः प्रजासूल्लासश्चेद्?

श्रूयताम्। 16.12.2012 दिनाङ्के रात्रौ प्रायेण नववादन एव भारतस्य राजधान्यां नवदिल्यामेव पुम्मित्रेण सह बसयानप्रतीक्षमाणया चिकित्साशास्त्रस्य त्रयोविंशतिवर्षीयया छात्रया 'निर्भया' इति प्रदत्तनाम्न्या सह गतिमति 'बस' याने षड्भिर्नरपशुभिर्जघन्यं दुष्कर्म विहितं येन तस्या अङ्गप्रत्यङ्गानि विश्लिष्टानि। 29.12.1912 दिनाङ्के 'सिंगापुर' देशस्य चिकित्सालये सा निर्भया गतप्राणा जाता। षट्स्वपराधिषु एकोऽवयस्को वर्षत्रयं यावत् कारागृहं प्राप्य निर्मुक्तः। 'रामसिंह' नामापरो नरपशुः 'तिहाड' कारागृहे आत्महत्यां कृतवान्। अन्येषां कृते न्यायाधीशैः प्राणदण्डः समादिष्टः। अधुनापि स प्रक्रियाधीनः तथापि विधास्यत इति सम्भाव्यते। कियन्ति वर्षाणि व्यतीतानि? सप्त वर्षाणि।

भो विचार्यताम्। एतन्मध्ये साक्षिणोऽपराधिभिः प्रताड्यन्ते, अपसार्यन्ते, आक्रम्यन्ते, हन्यन्ते। जनान्दोलनं शिथिलं जायते। प्रायेण नरपशवो विमुच्यन्ते। एतादृश्यां न्यायप्रणाल्यां जनताया विश्वासो दोलायते। प्रजाजन-स्त्वरितन्यायमीहतेऽन्यथा तु प्रभावशालिभिरपराधिभिः प्रमाणानि विनाश्यन्ते। अतः पशुचिकित्सक-दिशायाः बलात्कारिभ्यो रक्षापुरुषैर्दत्तो निर्णयो देशवासिभिः प्रशंसितः।

राजस्थानप्रान्ते तु विषमा स्थितिर्न्यायप्रणाल्याः। 'भटेरी' (जयपुरजनपदे) स्थले 22.9.1992 दिनाङ्के बालविवाहविरोधिन्या 'भँवरी' देव्या सह पञ्चभिः बलात्कारिभिः ग्रामणीसहितैः सामूहिकं दुष्कर्म आचरितम्। 1995 तम ईशवीयाब्दे अधस्तन-न्यायालये (Lower Court) सर्वेऽप्यपराधिनो विमुक्ताः। उच्चन्यायालये जून 1995 तमे वर्षे पुनः प्रथमं श्रवणं (Hearing) प्रारब्धम्। अद्यावधि त्रयोविंशतिवर्षा-नन्तरमपि नापरा श्रुतिः (Hearing) जातेति

समाचारपत्रैर्विज्ञायते। पञ्चस्वपि चत्वारो बलात्कारिणो मृताः। हा हन्त! अभियोगो निष्क्रियो जातः। अस्मादेवाभियोगकारणाद् उच्चतमन्यायालयेन 1996 तमे वर्षे कार्यस्थलेषु यौनहिंसाप्रतिरोधाय 'विशाखा' इति नाम्ना मार्गदर्शिका प्रसारिता। 2013 तमे वर्षे कार्यालयेषु महिलासंरक्षणार्थं नियमो निर्धारित आसीत्। किन्तु 'भँवरी देवी' अधुनापि निर्णयं प्रतीक्षते। कुत्रचन अधस्तन-न्यायालयेषु प्राणदण्डो निर्णीयते, परमुच्च-न्यायालये यावज्जीवं कारागृहवासदण्डे परिवर्त्यते। बलात्कारिणां कृते न कोऽपि प्राणदण्डः श्रूयते। अतो न किञ्चिदपि भयं बलात्कारिषु। अस्माद्धेतोः हैदराबादनगरे राजपुरुषैः (Police) विहितदण्ड-प्रणाल्याः प्रचण्डसमर्थनं विहितं प्रजाजनैः।

अधुना 'पोक्साकोर्ट' मध्ये षट्सहस्रमिता अभियोगा विचाराधीनाः। नैकस्मिन्नपि प्राणदण्डो निर्णीतः। दिङ्मात्रमेतत्। कदाचित् पुत्र्या सह पितुः, भगिन्या सह भ्रातुः, वर्षैकमपूर्णयाऽपि सह जघन्यानामनुचितकर्मणां वृत्तान्ताः प्रतिदिनं श्रूयन्ते पठ्यन्ते चेति लज्जास्पदमस्माकं देशस्य समाजस्य च कृते।

अत्रेदं विचार्यम्। कठोरदण्डविधानेन सह शिक्षासु चारित्रिकशिक्षाया अपि समावेशोऽप्यावश्यकः। प्रजाजनेषु भारतीयसंस्कृतेः संस्काराणामाधानमप्य-निवार्यम्। भारतीयसंस्कृतौ नारीसम्मानः प्राधान्येन वर्णितः। तथा हि-

**'सम्राज्ञी श्वशुरे भव, सम्राज्ञी श्वश्र्वां भव।**
**ननान्दरि सम्राज्ञी भव, सम्राज्ञी अधिदेवृषु।।'** इति ऋग्वेदे।

**'यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।**
**यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः।।**
**पिता रक्षति कौमारे भर्ता रक्षति यौवने।**
**पुत्रस्तु स्थविरे रक्षेद्.....।।' इत्यादयो मनुस्मृतौ।**

नार्युत्पीडकानां कृते कठिनतमदण्डोऽपि निर्धारितः। तथा हि-

**'आततायिनमायान्तं हन्यादेवाविचारयन्' इति,**
**'नाततायिवधे दोषो हन्तुर्भवति कश्चन' इति,**
**'परदाराभिमर्शेषु प्रवृत्तान् तान् महीपतिः।**
**उद्वेजनकरैर्दण्डैश्छिन्नयित्वा प्रवासयेत्।।' इति,**
**'पुरुषाणां कुलीनानां नारीणाञ्च विशेषतः।**
**मुख्यानां चैव रत्नानां हरणे वधमर्हति।।'**

इत्यादयो मनुस्मृतौ।

अत्रेदमाकूतम्। 'भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा' इति न विस्मर्त्तव्यम्। न्यायप्रक्रिया सुलभा भवेत्। षण्मासाभ्यन्तरे त्वरितगत्या निर्णयो भवेदिति प्रार्थ्यन्ते न्यायमूर्त्तयः। अलमिति।

---

**सादरमनुरोधः**

## जन्मशताब्दीविशेषाङ्कः

**अप्रेल 2020, मासे भारतीसंस्कृत-मास-पत्रिकायाः संस्थापकानां स्वर्गीय-श्रीगिरिराजशास्त्रि (दादाभाई) महोदयानां जन्मशताब्दी-विशेषांकः प्रकाशयिष्यते। दादाभाईमहोदयस्य स्मृतिविषयकानां संस्कृतलेखानां 31 जनवरी 2020 पर्यन्तं सम्प्रेषणाय भवन्तोऽनुरुद्ध्यन्ते।**

( गताङ्कादग्रे )

# विनायकसहस्रसिद्धे

❑ पं. राजेन्द्रमोहनशर्मा

विनायकस्तीव्रगत्या-उन्नतहिमालयशृङ्खलानां पारं गच्छतिस्म। इत्थं प्रतीयतेस्म यथा कोऽपि पूर्वमश्रुतोऽ-दृष्टोऽध्वनि समामन्त्रयतिस्म। स च तमेवानुसरन्नग्रे वर्धते। मार्गस्य दृषत्कणाः (Pebbles) प्रस्तराः- तीक्ष्णकण्टकाः शूलाश्च तस्य मार्गावरोधं कर्तुं नाशक्नुवन्। तीव्रगत्या चलन् विनायकः एकस्याः पर्वतशृंङ्खलायाः उपरि निर्मिते मन्दिरे प्राविशत्। विशालकायस्य मन्दिरस्य भव्यः परिसरो द्योतयतिस्म यत् कश्चनात्र एतादृशो जनो विद्यते यो मन्दिरं परितः स्वच्छं विदधाति प्राकृतिकसौन्दर्यं च रक्षति। परन्तु तत्र कस्याप्यावागमनस्य चिह्नं नैव दृश्यतेस्म। वस्तुतस्तु विनायको यदा जलसागरे मन्दिरस्य प्रतिबिम्बमपश्यत् तदैव तस्य मनसि उत्कण्ठा जाता यदस्मिन् हिमक्षेत्रे एतादृग् विशालं मन्दिरं कदा निर्मितम् ? कश्च तत्रायाति? इत्थं विचारमग्न एव विनायकोऽत्र समागच्छत्।

त्रिशिखरस्य गोलगुम्बदैः, परिवृतो मन्दिरस्य शीर्ष-शिखरे सप्तरङ्गध्वजः शोभतेस्म। विशालभित्तिभिः परिवृतः क्रमशः विशालतः सूक्ष्म भवन्तम् अन्तः गच्छन्तं मन्दिरं दृष्ट्वा विनायकः आश्चर्यमग्नः संजातः। स्थापत्यकलाया अद्भुतमुदाहरणं दृष्ट्वा विनायको विचारमग्नोऽजायत। यत्र कोऽपि सारल्येन नागन्तुं शक्नोति दूरं यावत् यत्र मानवानां वसतिर्न भवेत् तत्र कः एतादृशो जनो भवेत् यः परमपवित्रे नीरवां शान्तिं सेवते। विनायकोऽभ्यन्तरे प्रविविक्षुरासीदेव तस्मिन्नेव क्षणे स मधुरध्वनीनां कर्णप्रियं संगीतमशृणोत्। विनायकः पुनः द्वयोः हस्तयोः कनिष्ठिकां दक्षिणवा-मकर्णछिद्रेषु आयोजयत्। उच्चैः कर्णावकम्पयच्च।

स पूर्णरूपे विश्वासं कर्तुमैच्छत् यत् सत्यमेव कश्चन नूपुरध्वनिरायाति अथवा भ्रम एव विद्यते। द्वित्रिवारं प्रक्रियामिमां कृत्वा यदा स आश्वस्तः संजातो यत् सत्यमेव मन्दिरस्य गर्भगृहात् ध्वनय आगच्छन्ति तदा स शनैः शनैः निःशब्दमग्रे प्राचलत्। विनायको मन्दिरस्य प्रथमद्वारे प्राविशदेव तदैव सहसा द्वौ बलिष्ठौ कालपुरुषौ समाययौ किमशब्दं विनैव-एको बलिष्ठो निम्नो भूत्वा विनायकं स्वस्कन्धम्-आरोपयत् द्वितीयश्च कम्बलेन विनायकमाच्छाद्य तस्य मुखोपरि हस्तं निधाय विनायकमुच्चारणशून्यमकरोत्। तौ तीव्रगत्या बहिरागत्य बहिर्विशालेन शिलाखण्डेन निर्मित-नदीप्रतिमया विनायकं बद्ध्वा अगच्छताम्।

शनैः शनैः दलस्य सर्वे जनाः स्वकीयवस्त्रावासेषु गत्वा व्यश्रमन्। मूषको लक्षश्च नित्यमिव विनायकस्य छायेव सहैवाचलताम्। परन्तु शीघ्रगत्या गच्छन् विनायकः सहसा नेत्राभ्यामदृश्योऽभवत्। तौ अजानताम् संभवतो विनायक एकान्तमिच्छति। इत्थं विचारयन्तौ तौ त्रिकोणस्यैकस्य शिलाखण्डस्याधोभागे समुपविश्य व्यश्रमताम्। परस्परं हासपरिहासे उभौ संलग्नावभूताम्। निशायाः त्रितयः प्रहरो व्यत्येतीति तौ नैवाजानताम्।

यत्र जलसागरः स्थितः- तस्मिन् पर्वतीयप्रदेशे सूर्यः एव प्रथममुदेति। ज्योत्स्नास्तं यातिस्म। सूर्यः स्ववैभवेन सहोपातिष्ठत्। मूषकलक्षयोः कृते कौतुकस्य विषयः संजातः। इतः पूर्वं तौ यदा यदा सूर्योदयं सूर्यास्तं चापश्याताम् तदा स सदैवारुणिमामयमेव सूर्योदयमपश्यताम्। परन्तु विचित्रोऽयं सूर्योदय आसीत् यत्र सूर्यः पूर्णरूपेण श्वेत एवोदितोऽभवत्। मन्ये सूर्यः सागरे स्नातुमागच्छति। दिगम्बरं सूर्यं दृष्ट्वा ज्योत्स्ना लज्जया स्वीयमाननं परावर्तयत्। स्वकीय-नेत्राभ्यामिदम-विश्वसनीयं दृश्यं पश्यन् मूषकः स्वयं जलसागरे तरितु-मुत्कण्ठितः संजातः। स लक्षात् स्नातुमनुमतिमैच्छत्। परन्तु लक्षो दृढं न्यषेधयत्। लक्षोऽवदत् किं त्वं न पश्यसि? इदं परम पवित्रं शुद्धं शान्तक्षेत्रं धूलकणैर्लिप्तगात्राणां त्वादृशानां स्नानक्षेत्रं न विद्यते। एष जलराशिः अत्रत्यानां जीवानाममृतं पेयमस्ति। न वा इमं मलिनं कर्तुं शक्नुमः। पुनश्च त्वं नास्ति कापि ऋषिबाला।

मूषको लक्षकथनं श्रुत्वा जहास। प्रतीयते त्वं पूर्वं कदाचित् ऋषिबालानां सौन्दर्ये प्रतिबद्धः संजातः। परन्तु लक्षो न किमप्युदतरत्। स तु अपृच्छत् वदतु विनायकः कुत्रागच्छत्? रात्रिः सम्पूर्णा व्यतीता। आवां चात्र वार्तालापे मग्नौ। विनायक एकाकी नैव त्याज्यः। मूषकोऽवदत् विनायकस्य सुरक्षाविषये न भेत्तव्यम् परन्तु इदं सत्यमस्ति एकाकी विनायकोऽसुविधाग्रस्तोऽवश्यं भविष्यति।

( प्राचार्य )
पुरानी बस्ती, चांदपोल बाजार, जयपुर

# अग्नीनां पुनराधानं प्रवासविधिश्च

❑ प्रो. भगवत्शरणशुक्लः

''यज्ञो वै श्रेष्ठतमं कर्म'' इत्युक्तेः सत्त्वात् श्रोत्रियोऽग्निहोत्री न कदाचिदग्निहोत्रं त्यजति। एकदा यदाग्निपरिग्रहं विदधाति तदा यावज्जीवनमग्निहोत्रं जुहोति इत्येषो विधिर्वर्त्तते।। अग्निहोत्री च स्वाग्न्यागारे गार्हपत्या-हवनीयावसथ्याग्नीन् अखण्डान् स्थापयेत्। प्रारम्भे यथाग्निपरिग्रहोऽवश्यकर्म भवति तथैव तेषां खराणा-मग्नीनामपि संरक्षणमावश्यकं कर्म भवति। एतदर्थं परम्परायां शुष्कानि गोमयगोलकानि कारयेत्। तानि अग्नौ दत्त्वा तेषामङ्गारान् विधाय सर्वतस्तान् भस्मैरावृतान् कुर्यात्। मध्ये किञ्चिदनावृतं स्थानं भवेत्। सायं प्रातश्चाग्निहोत्रमग्निं प्रज्वाल्य यथाविधि होमं कुर्यात्। अनेन विधिनाग्निरखण्डो भवतीति परम्परायामित्थं श्रूयते विधीयते च। अग्निहोत्रं कर्म सर्वदा सपत्नीक एव कुर्यात्। प्रतिमासं यथानियमं दर्शपौर्णमासयागं कुर्यात्। अग्न्यागारञ्च मार्जारकाकश्वप्रभृतिभिः यागदूषकतत्त्वैः सर्वथा रक्षेत्। अग्नि-होत्राङ्गभूता गाश्च पालयेत् संरक्षेच्च ताः। पर्वदिवसेषु यथाविधानं व्रतोपवासादिकं चरेत्। विहितपदार्थान् भुञ्जीत। क्षौरकर्म सत्यभाषणमतिथिसेवनमित्यादि नियमान् पालयेत्। अग्निशालायामग्नीनां परस्परं सम्मिश्रणं च न भवेदिति सावधानेन सर्वं विचार्य तान् संरक्षेत्।

विषमपरिस्थितौ अग्निहोत्री गृहीताग्निः तानग्नीन् विसृज्य भस्मादीन् निःसार्य खराणाञ्च पुनः पञ्च भूसंस्कारादीन् च विधाय अग्नीनां पुनराधानं पूर्ववदेव कुर्यात्। यदा विषमपरिस्थितिश्च भवति संवत्सरमध्ये वित्तपशुजनादीनां हानिः। धनादिना प्रसिद्धो यः प्रागाधानाल्लब्धप्रतिष्ठोऽपि अग्न्याधानस्य पश्चात् संवत्-सरादर्वागेव वित्तादिहानेश्चेदप्रतिष्ठित इव भवति फलतः सः तानग्नीन् विसर्जयेत्। पुनश्च न अग्न्याधानं कुर्यात् इति प्रतिपादयन्ति श्रौतसूत्रकाराः।[1]

''राज्ययशः काममस्य वा'' इति सूत्रेण[2] कात्यायनः राज्ययशःकामस्य ब्राह्मणादेः पुनरग्न्याधानं कथयति। तत्र यस्मिन् दिने सपत्नीको यजमानः पुनरग्न्याधानं वाञ्छति तस्य दिनस्य त्रिरात्रचतूरात्रपञ्चरात्रसंवत्सरपर्यन्तं पुरस्तात् गार्हपत्याहवनीयदक्षिणाग्नीनामुत्सर्गः (विसर्जनम्) तेन कार्यः। किन्तु सभ्याग्नेर्विसर्जनं न भवतीति कर्काचार्यो वदति।[3] अथवा शीघ्रमेवाग्निपरिग्रहं कुर्यात्। अग्निपरिग्रहस्य पुनः विचारे पुनर्वसुनक्षत्रे, वर्षर्तौ मध्याह्ने वा कुर्यात्। तच्चाग्न्याधानं कुशैः कुर्यात् न च समिद्भिः। पुनरग्न्याधान-विषये शङ्खायनब्राह्मणेऽपि प्रतिपादितं विद्यते- ''**तदाहुः कस्मिनृतौ पुनरादधीतेति वर्षास्विति हैक आहुर्वर्षासु वै सर्वे कामाः सर्वेषामेव कामानामाप्त्यै मध्यावर्षे पुनर्वसू नक्षत्रमुद्दिश्य पुनरादधीत पुनर्मावसु वित्तमुपनमत्वि-त्यथो पुनः कामस्योपाप्त्यै तद्वै न तस्मिन् काले पूर्वपक्षे पुनर्वसुभ्यां सम्पद्यत उपाप्तोऽमावस्यायां कामो भवत्युपाप्तो वर्षासूपाप्तः पुनर्वस्वोस्तस्मात्तस्यां पुनरादधीत, पञ्चकपालः पुरोडाशो भवति पञ्चपदा पङ्क्तिः पाङ्क्तो वै यज्ञो यज्ञस्यैवाऽऽप्त्यै**[4]।।''

यदि सद्यः अग्नीनामुत्सर्गः क्रियते तदा अर्कपत्रयोः कपालस्थानीययोः आवसथ्याग्निना (आवसथ्याग्नेरपि विसर्जनं न भवति) लौकिकाग्निना वा पक्वं व्रीहिमयमपूपं गार्हपत्यस्थाने पञ्चभूसंस्कारस्य पश्चात् पूर्वं सम्भारेभ्यः स्थापयेत्। एवमाहवनीयस्य स्थाने (खरे) अर्कपत्रयोः पक्वं यवमयमपूपं स्थापपेत् अपूपस्योपरि हिरण्यादिसम्भारान् स्थापयेदिति प्रतिपादयति ''व्रीह्यपूपमर्कपलाशयोः पक्वं गार्हपत्यस्थाने निदधात्येवमाहवनीयस्य यावँ सद्यश्चेत्'' इति सूत्रेण कात्यायनः[5] पूर्णाहुत्यनन्तरं पवनेष्ट्यादीनां स्थाने आग्नेयः पञ्चकपालः पुरोडाशः उत्तमानुयाजात् पूर्वमुपांशु कार्यः। उत्तमानुयाजप्रभृतिकर्म सर्वमुच्चैः मन्त्रपाठैः कुर्यात्। अथवा उत्तमानुयाजं वर्जयित्वा सर्वं कर्म उपांशु कुर्यात्[6] किञ्च प्रथमे प्रयाजे प्रथमेऽनुयाजे च अग्नीन् त्यज इत्येव वदेत्। न समिधो यज, देवान् यज इति ब्रूयात्। द्वितीय

आज्यभागः अग्नये पवमानाय, अग्नये इन्दुमते कुर्यात् न तु सोमाय, प्रथमस्तु, आग्नेय एव कुर्यात्। अस्मिन् कर्मणि दक्षिणा हिरण्यम् अनड्वान् भवति ऋत्विजां कृते। अग्न्याधानस्य सर्वं कर्म पूर्ववदेव भवति।[7] स च विधिरित्थं विद्यते। यस्य कार्यस्य सिद्धये पुनराधानं वाञ्छति यजमानस्तस्य कृते पूर्वं सङ्कल्पं कुर्यात्। अनन्तरं शिखोपस्थकुक्षिविरहितं क्षौरकृत्यं कारयेत्। नूतनवस्त्रं धारयेत्। यजमानपत्नी नखकर्त्तनमात्रं कारयित्वा स्नानादिकृत्यं विधाय नूतनवस्त्रं धारयित्वा पत्या सह अग्न्यागारं प्रविशेत्। पूर्वद्वारेण यजमानः, दक्षिणेन च यजमानपत्नी। तत्र गार्हपत्याग्नेराधाने अजबन्धनवरदानादि-कृत्यं पूर्ववदेव विधाय लौकिकाग्नौ पक्वान् ब्रीहिमयापूपान् अर्कपत्रेषु पलाशपत्रेषु वा गार्हपत्यखरे निदध्यात्। अत्रार्कपत्रं पलाशपत्रं वा कपालानां प्रतिनिधिर्भवति। आहवनीयखरे च यवमयापूपान् कर्मपत्रे पलाशपत्रे च निदध्यात्। अध्वर्युः यजमानाय अरणिं प्रदाय अग्निमन्थने अग्निं प्राप्य पूर्वं गार्ह्यपत्ये खरे स्थापयेत्। पश्चादश्वबन्धन-भ्रमणादि-संस्कारैः आहवनीखरं संस्कृत्य तत्राग्निं स्थापयेत्। अन्यानि सर्वाणि कर्माणि अग्न्यन्वाधानं ब्रह्मोपवेशनं, व्रतग्रहणं प्रणीतावयवं हविर्ग्रहणं हविर्निर्माणं, प्रधानयागः दक्षिणादानं ब्राह्मणभोजनसङ्कल्पः तेषां भोजनादिकमित्यादि कार्याणि क्रियन्ते। बौधायनश्रौतसूत्रा-नुसारेण पुनरग्न्याधानकाले धारितानि नूतनवस्त्राणि सम्पन्ने कृत्ये हिरण्यमनड्वान् च दक्षिणायाम् अध्वर्यवे दद्यात्।[8] शांखायनश्रौतसूत्रेऽप्येवमेव प्रतिपादितम्- **''पुनरुत्स्यूतो जरत्संव्यायः पुनः संस्कृतः कद्रथो अनड्वान् हिरण्यं वा दक्षिणा।[9]''**

इत्थं पुनरग्न्याधानस्य विधिः श्रौतग्रन्थेषु प्रतिपादितः। कदाचित् यजमानः प्रवासे भवति। यद्यपि सामान्येन श्रौताग्निधारकः श्रोत्रियो ब्राह्मणः कुत्रापि न गच्छेत् तीर्थादि-यात्रापि तस्य कृते तथा नावश्यकी। अग्न्याधानं यागविधानमेव तस्य तीर्थयात्रादिकर्म भवति। तथापि विशेषपरिस्थितौ प्रवासप्रसङ्ग आयात्येव। तदा अग्निहोत्रा-दिनित्यं कर्म कथं सम्पादयेदिति प्रश्न उदेति। एतस्मिन् विषयेऽपि शांखायन ब्राह्मणे सङ्केतो विद्यते यत् यात्रायां क्वचित् प्रवासे सत्यपि अग्निहोत्रकर्म व्यवस्थाप्यैव गच्छेत् पुरागमने सति पूर्ववदेव कर्म कुर्यात् -

**''अथ यत् प्रवत्स्यंश्च प्रोषिवाँश्चाग्नीनुपतिष्ठतेऽभिवादो हैष देवतायै यदुत्काशं भवति अथोऽग्निभ्य एवैतदात्मानं परिदधाति ये चैनमन्वञ्चो भवति।''**[10]

कात्यायनश्रौतसूत्रेऽस्मिन् विषये प्रतिपादितं यत् प्रोषितोऽपि यजमानो यथाकालं यथावत् स्वकर्म कुर्यात्। अग्निहोत्रकाले सायं प्रातरग्निहोत्रं कुर्यात् पौर्णमासकाले च पौर्णमास्यम्। चेत् सर्वं कर्म न सम्भवं तर्हि तत्तत् समये यदात्मसंस्कारकं व्रतग्रहणक्षौरकर्मादि तत् आत्म-संस्कारं मत्वा कुर्यात्। अयं हेतुरित्युपदेशश्च। आत्मसंस्कारा इमे कर्त्तव्या इति हेतुः इमे कर्त्तव्या इत्युपदेशः। किञ्च यद् दृष्टादृष्टकर्म विष्णुक्रमणनित्यजपा कर्म भवति तदपि प्रोषितेन यजमानेन कर्त्तव्यम्। प्रवासादागत्य गृहम् इच्छा-कल्पितदेशे वाचंयमो भवेत्। प्रवासादागमनसमये समित्पाणिः कृतवाग्यमः समागत्य गुरुपित्रादीन् प्रति प्रणामादि विधातुमगत्वैव पूर्वं स्नानादिकां नित्यक्रियां विधाय अग्नीन् उद्धृत्य तानुत्तिष्ठेत्। ततः उपविश्य तूष्णीं समिधानं परिसमूहनं च कुर्यात्। परिसमूहनमत्र कुशादि-तृणानामपनयः कथ्यते। अथवा प्रवासादागत्य पूर्ववदुत्प-विक्रमेण तुष्णीम् अग्नीन् उपतिष्ठेत् न मन्त्रैः। तत्र आहवनीयगार्हपत्यदक्षिणाग्नीनां तुष्णीमुपस्थानं कुर्यात्। अनन्तरं गृहा मा विभीत, गृहानुपैति, क्षेमाय वः इति मन्त्राणां जपं कुर्यात्। पुत्री, पुत्रपत्न्यादीनां कृतापराधानामपि प्रवासादागत्य तस्मिन् प्रथमे दिवसे शमेन तैः वर्तयेत्। द्वितीयदिवसे एव तस्य विषयस्य समाधानं कुर्यात्। इति[11] शाङ्खायनश्रौतसूत्रेऽपि यद्यपि तथैव प्रतिपादितं तथापि तदपेक्षया किञ्चित् कृत्येषु भिन्नता विद्यते। यजमानपत्नी यदा पितृगृहादिं प्रति याति तदा अग्निमरणी-मध्ये समारोप्य अरणीं सहैव नयेत्। अग्निहोत्री अपि तथा सदैव गच्छेत्

अग्निहोत्रम् इष्टपात्राणि अन्या सामग्री च सदैव यास्यति। चतुर्दशीं यावत् प्रयासं विधाय तस्मिन्नेव दिवसे स्वगृहमागच्छेत्, पूर्णिमातः स्वकार्यं विदध्यात्। पौर्णमास्यामग्निमन्थनं विधायाग्निं संस्थाप्य प्रतिपदि दिने इष्टिं कुर्यात्। पौर्णमासीममावस्यां वा यावत् प्रतिदिन-मग्निहोत्रं कुर्यात् पश्चात् अग्निम् अरण्योरारोप्याखिलपात्र-सामग्रीभिः सहितः सपत्नीकः प्रवासे गच्छेत्। चेत् पतिरेकाक्येव प्रवासे याति तर्हि प्रवासविधिना गच्छेत्। स च विधिरित्थं शङ्खायनश्रौतसूत्रे कथितः-

**''याजमानप्रसङ्गेन प्रवासप्रारम्भे याजमानमुच्यते। प्रवत्स्यन् अग्नीन् विहृत्याप्रसक्तान् गार्हपत्यस्य पश्चात् प्राङ्मुखः स्थितः सर्वान् ईक्षते।''**[12]

अग्न्युपस्थानस्यानर्थलुप्तं प्रवसञ्जपेत प्रज्वलिता-नामुपस्थानम्। यावत्प्रज्वलितास्तान् वाग्यमनम्।[13]

यस्य यावज्जीविकः प्रयोगः तस्य याजमानं प्रोषितोऽपि कुर्यात् अर्थात् स्वग्रामगृहस्थानाद् बहिरन्यं ग्रामं नगरं देशं वा प्रति गमनकाल : प्रवासे स्वभिन्नग्रामेषु तिष्ठेत् रात्रौ चेत् सः प्रवासः कथ्यते।[14] तत्र प्रवासगमनात् पूर्वमग्न्यागारे पूर्वेण यजमानो दक्षिणद्वारेण यजमानपत्नी चासने उपविश्य सङ्कल्पं विधाय गार्हपत्यादग्निमादाय आहवनीये दक्षिणखरे चाग्नीन् स्थापयेत्।

क्रमशश्चात्र गार्हपत्ये आहवनीये दक्षिणे सव्ये च समन्त्रकम् उपस्थानं कुर्यात्। वाग्यमनं विधाय प्रवासार्थं व्रजेत्। सायं यावत् चेत् पुनरागमासंशयश्चेत् यत्र स्यात् तत्रैवाग्निहोत्रं कुर्यात् पूर्वाभिमुखः। सायं प्रातश्चाग्निहोत्रं कुर्यात्। पर्वणि काले प्रवासे विद्यमानेऽपि शरीरसंस्कारान् कुर्यात्। अथवा आनुमानिकसमये स्वकृत्यं सर्वं कुर्यात्।

प्रवाससमयेऽपि एकाकी गच्छति चेत् तदा ऋत्विग्भ्यः स्वपत्न्यै च सर्वकृत्यं समर्प्य वा गच्छेत्। तत्र च स्वहस्तेन भोजनं निर्माय भक्षयेत्। तत्रापि हविष्यान्नमेव भक्षयेत्। दुग्धं, फलानि, मूलानि, केवलमग्निपक्वं यवादिकं हविष्यान्नं प्रोषितो यजमानः श्रोत्रियो ब्राह्मणः भक्षयेत्। एतस्मिन् विषये देवयागपद्धतावपि प्रतिपादितम् -

**''निक्षिप्याग्निं स्वदारेषु परिकल्प्यार्त्विजं तथा।**
**प्रवसेत् कार्यवान् विप्रो मृषैव न चिरं क्वचित्।।''**[15]

**''इक्षुक्षीरविकारांश्च भ्राष्टभ्रष्टयवांस्तथा।**
**फलमूलानि चानीयात् पर्वणि प्रोषितोऽग्निमान्।।**
**पराग्निपक्वं नाश्नीयात् गुडगोरसमन्तरा।**
**असामर्थ्यात् शरीरस्य भक्ष्यद्रव्याद्यभावतः।।**
**स्वसत्तया पचेदन्नमश्नीयात् प्रोषितोऽग्निमान्।।''**[16]

प्रवासानन्तरं समित्पाणिः गृहमागत्य गुरुपित्रादीन् अनत्वैव स्नानादिनित्यकर्म विधाय अग्नीन् चाराध्य गृहमुपस्थाय पुत्राणां समन्त्रकं शिरांस्याघ्राय तेषां कर्णयोः मन्त्रं पठेत्। पुत्रीणां च शिर आघ्राय पूज्यानां गुरुपितृ-पितृव्यपितामहमात्रादीनां यथाविधि प्रणामादिकमाचरेत्। स्वकुटुम्बजनेषु स्नेहेन व्यवहरेत्, इत्येवं प्रवासविधौ कर्म कुर्यात्।

अग्निहोत्रकर्मणा न केवलमग्नीनामपितु समेषां विश्व-प्राणिनां तेनैव माध्यमेन कल्याणं भवति। समस्तलोकाः सुखिनो भवन्ति। अतः विश्वकल्याणाय एते यागाः अग्निहोत्रादीनि कर्माणि च श्रौतसूत्रादिविधिना द्विजाः कुर्युः शूद्राः तेषां पूर्णतया साहाय्यं विदध्युः। तदैव काले सर्वाणि कार्याणि कल्याणकारीणि स्युः।

**आचार्यो व्याकरणविभागे**
**संस्कृतविद्याधर्मविज्ञानसङ्कायः**
**काशीहिन्दुविश्वविद्यालयो वाराणसी**

(1) का. श्रौ. सू. पुनराधेयमाधानाप्रतिज्ञातस्य।। 4.11.1
मैत्रेयी संहिता 1.7, 2.5, श.ब्रा. 2.2, 1.1, श.ब्रा. 2.2.1.4
(2) का.श्रौ. 4.11.2 (3) का.श्रौ. 4.11.3-5,7
(4) शां.ब्रा. 1.3 (5) का.श्रौ. 4.11.8
(6) का.श्रौ. 4.11, 9-10 (7) का. श्रौ. 4.11.11-15
(8) बौधा. श्रौ. 3.1 (9) शां. श्रौ. सू. 2.5, 27
(10) शाङ्खायन ब्रा 2.5 (11) का. श्रौ. 4.12.13-23
(12) शा. श्रौ. 2.14.1 (13) शा. श्रौ. 2.14.6 (14) शा. श्रौ. 2.14.8
(15) देवयागपद्धति पृ. 112 (16) देवयागपद्धति पृ. 118

# हाइकु-स्तबकः

❑ डॉ. हर्षदेवमाधवः

भूत्वा नगरे
मार्गवृक्षः पश्यामि
प्रथम वृष्टिम्।।
मृदित्वायान्ति
रङ्कजनभाग्यानि
पुरे यानानि।।
सृष्टेस्सौन्दर्यं
ज्ञापयितुं रथ्यासु
जाताः शूकराः।।
पश्यन्ति बन्धून्
विस्मृतपरिचया
वृद्धास्साश्चर्यम्।।
अवगुण्ठिता
वल्लीभिर्वृष्टौ वध्वः
क्षेत्रवृतयः।।
कण्टकावृताः
क्षेत्रवृतयोऽलङ्कृता
विव्लष्टौ वल्लीभिः।
सरोजलेन
दत्ता स्वशान्तिर्मम
श्रान्तमनसे।।
संकोच्य गात्रं
यात्रया श्रान्तं जलं
सुप्तं पल्वले।।
प्रमार्जयितुं
नगररङ्कभाग्यं
मेघा आगताः।।
करोति द्रोहं
पाकिस्तानीरुधिरं
शरीर-राष्ट्रे।।
पतिं वृक्षं
सदयं स्पृशन्त्येते
बान्धवाः खगाः।।
शुनो दायादैः
प्राप्ता सङ्कीर्णा रथ्या
योध्दुं बन्धुभ्यः।।
रहो मैथुनम्।
मदिरापानोत्तरं
रिक्ता कूपिका।।
नगरस्वप्नान्
दृष्ट्वा ग्रामीणा भ्रष्टाः
प्रकृत्युत्सङ्गात्।।
वृष्टिः / वीरुधः
उद्भिन्ना रिक्ततायां
छिन्नमनसः।।
शान्तिः / शक्नोमि
गन्तुमन्तः सुदूरं
योजनशतम्।।
वृष्ट्या प्ररूढाः
वीरुधः पाचयन्ति
दीनानामन्नम्।।
प्रसूते शनी
महर्घतामज्ञात्वा
पञ्चशावकान्।।
स्नुहीकण्टकान्
उपेक्ष्य लुण्ठाम्यहं
पुष्पसौन्दर्यम्।।
शैलशिखरे
सुप्ता गृहविहीना
मेघा निशीथे।।
सूर्यातपस्य
चञ्चुरुल्लिखति मे
स्वप्ना नेत्रयोः।।
अपरिचिता
नेतृकण्ठगरलात्
पुष्पमालेयम्।।
निवसन्त्यब्धौ
दुरात्मनो मकरा
महार्हरत्नैः।।
न परिचिता
गन्धेन चिन्ताग्रस्ता
जना उद्याने।।
कोलाहलानां
नगरे प्ररोहति
कवीनां शान्तिः।।
व्यतीतमायु-
र्मे - शलभैः, पुष्पैः
शब्दैर्ज्योत्स्नाभिः।।
भाग्यविहीना
न जीविता न मृता
नगरे वृक्षाः।।
दिने द्योतन्ते
रात्रौ प्रशान्ता दीपाः
प्रशासनस्य।।
वियुक्ता मत्तः
प्रियबान्धवा वृक्षा
नृशंसदेशे।।
मलिनजले
तरन्ति नगरस्य
रात्र्याः पापानि।।
स्कन्धमारोप्य
वल्लीः वृक्षाः पितृत्व-
मनुभवन्ति।।

आविलं जलं
मेघावतारं प्राप्तुं
शोषमुपैति।।
विद्यासागरा
दानहीना गर्जन्ति
व्यर्थजीवना:।।
नावगम्यते
कलकलेन व्यक्तं
काकानां दु:खम्।।
नैव जानन्ति
गृहकलहव्यग्रा:
ऋतुमुद्याने।।
जीविकाचिन्तां
कुरुतो विद्युत्स्तम्भे
स्थितौ कपोतौ।।
उपेक्ष्य छिन्ना:
शाखा: स्थितोऽस्ति वृक्ष:
श्रद्धया भुवि।।
नेच्छामि द्रष्टुं
कमपि वातायनात्।
दृश्यन्ते वृक्षा:।।
गच्छन्ति कृत्वा
धरित्रीतीर्थयात्रां
श्वेता जलदा:।।
पुर-कुरूपं
विभूष्य हरितिम्ना
प्रयाता मेघा:।।
उद्विग्नास्सन्ति
सर्वकारस्य भुवि
बन्ध्या: पादपा:।।
नद्या यौवनं
मदयति निकामं
धत्तुरगन्ध:।।
जलदै: कृता
मे कठिना यात्रा
स्निग्धार्द्रहरिता।।
अपहरन्ति
तिमिर-दु:खं केचि-
दाग्नेयकीटा:।।
पृथिव्या व्रणा:
पल्वलानां मिषेण
पूरिता मेघै:।।
शरज्जलदा:
परिधाय सन्ध्यावर्णान्
यान्ति मेलायाम्।।
आह्वयन्ति मां
गवाक्षजालिकाभ्य:
पुष्पस्तबका:।।
विकीर्णो व्योम्नि
भवन-केशराशि:
भवति धूम:।।
ग्रामपुष्पाणि
विक्रयार्थं नयति
सादरं पुरम्।।
विदेशिवृक्षै-
र्निष्कासिता नगरात्
स्वदेशौषधी:।।
अन्तिमक्षणे
वृद्धेन सारभूतं
प्रदत्तं हास्यम्।।
नैव म्रियते
मक्षिकापि नेतृणां
मृषा भाषणै:।।
कृपणधनं
रक्षितुं वीरगतिं
प्राप्तोऽस्ति शुना।।
आलिखिताऽस्ति
सूर्यातपे छायासु
चिल्लानां गति:।।
विस्मरति खं
खगचञ्च्वाघातेन
व्रणानां पीडाम्।।
ब्रुवन्त्युलूका
रुदन्ति श्वान:। जात:
किं कोऽपि नेता?।।
मृतवृक्षस्य
शोकसभायां स्थिता:
केचिद् विहगा:।।
कुर्वन्ति चर्चां
वृत्तपत्रस्य खगा:
प्राङ्गणे प्रात:।।
रुग्णशय्यायां
कुशलं स्प्रष्टुकामा:
प्राप्ता मक्षिका:।।
कर्तुमिच्छामि
रक्तदानं नगरे
रुग्णवृक्षेभ्य:।।
निपीय जाता
रुग्णा मशका: पुरे
मनुष्यरक्तम्।।
गतदिनस्य
बुभुक्षां विस्मृत्य श्वा
जागर्ति पुन:।।
आश्वासयन्ति
छिन्नशाखं पादपं
स्कन्धस्था: खगा:।।
पुरे दीनेभ्य:
प्रोत्तुङ्गभवनानि
छायाहीनानि।।

**8, राजतिलक बंगलो,**
**आबादनगरसमीपे,**
**बोपल, अहमदाबाद-58**

# एका लघ्वी जिज्ञासा

❑ आचार्यः डॉ. नारायणशास्त्री काङ्करः विद्यालङ्कारः

**( राष्ट्रपतिसम्मानितानां विद्वद्वर्याणां डॉ. काङ्कराणां नवीनमेकं विषयं प्रस्तुवन् प्रश्नोऽयं नूतनां दृष्टिभङ्गीं प्रस्तौतीति विदुषां विचाराय प्रकाश्यतेऽयं लेखः- प्रधानसम्पादकः )**

देश-विदेशयोः समस्त-वैदिक-विभूति-श्रीपाद-पद्मेषु सादरं सविनयं वन्दन-प्रसूनाञ्जलिं समर्प्य लघ्वीम् एकां स्वकीयां जिज्ञासां समाधातुं प्रस्तौमि अत्र-

कस्याश्चिद् भाषायाः ज्ञानं विना तथा भाषया लिखितविषयस्य चर्चाकरणं तस्मिन् विषये अनुसन्धानस्य वार्त्ताकरणं वरं किं कदापि सम्भवेत्। यदि नैव, तर्हि पुनरपि इदं सर्वं जायमानं वर्त्तते वत्स्र्यति च। अस्य उदाहरणरूपे समये-समये देश-विदेशयोः आयोज्यमानानि वेदसम्मेलनानि प्रस्तोतुं शक्यन्ते।

वेदानुरागिभिः जनैः विषयानुसन्धानदृष्ट्या वेद-शिक्षां दातुं बलाधानं बहु क्रियते, शुद्ध-वेद-पाठे तु अवधानं सदैव रक्ष्यते च। परन्तु वैदिक-भाषां शिक्षितुं शिक्षयितुं च अद्यावधि क्वचित् किञ्चित् विचारितं चिन्तितम् अपि नैव। तत् कार्यरूपेण परिणमयितुं वार्ता तु बहु सुदूरे वरीवर्त्ति।

अस्य एव अयं परिणामः यत् वैदिकभाषया वैदिक-विद्वांसः अपि परस्परं सम्भाषणं कुर्वन्तः अथवा पत्र-व्यवहारम् आचरन्तः कदापि नैव दृष्टाः। वैदिक-भाषया कुतश्चित् प्रकाश्यमाना काचित् पत्र-पत्रिका अपि दृष्टिपथं नैव अवतीर्णा। विश्वविद्यालयेषु वैदिक-परीक्षाणां प्रश्नोत्तरमाध्यमम् अपि न अस्ति कुत्रचित् वैदिक-भाषा-रूपम्।

वैदिक-भाषया गद्य-पद्य-काव्यं रचयतः कस्यचिद् विदुषः दर्शनं नैव जातम्। वैदिक-भाषायाः कवि-सम्मेलनानि अपि क्वचित् आयोजितानि नैव श्रुतानि। वैदिक-भाषया रचितस्य साहित्यस्य पुरस्कारार्थम् आयोजिताः स्पर्धाः अपि दृष्टिपथं नैव आयाताः।

किम् अधिकं कथनीयम्? वैदिक-प्रतिष्ठानेषु, तद्-द्वारा आयोजितेषु वैदिक-सम्मेलनेषु, आयोजितासु वैदिक-सङ्गोष्ठीषु च अपि वैदिक-भाषया व्यवहारः दृष्टिगोचरः न भवति। अत्र मञ्चस्थ-महापुरुषाणां भाषणानि, उद्बोधनानि, आशीर्वचनानि च अपि वैदिक-भाषया न भवन्ति। किम् इदं कटु-सत्यं न अस्ति? गम्भीरतया चिन्तनीयः विषयः वर्त्तते अयम्।

आकाशवाण्याः दूरदर्शनस्य च कार्यक्रमेषु वैदिक-भाषाया उपयोगस्य वार्त्ता तु बहु-दूरे तिष्ठति। इयम् एव वार्त्ता चित्रपट-जगतः विषये अपि स्वीकरणीया। महद् आश्चर्यं बोभवीति यत् विना वैदिक-भाषा-ज्ञानं जनाः वैदिक-विषयाणां चर्चां कस्मिन् आधारे कुर्वन्ति? वेदेषु इदं लिखितम् अस्ति, तद् लिखितम् अस्ति इत्यादिरूपं वेदानां गुणान् गायन्तः अपि ते नैव श्रान्ताः भवन्ति।

विना वैदिक-भाषा-ज्ञानं ये जनाः वेदानां वार्त्ताः कुर्वन्ति, अहं तु मन्ये, ते 'अटकल'[1]- द्वारा वेदानां स्वेच्छया अर्थं कुर्वन्ति। अतः एव तु स्वकीयेन अटकलेन वेद-मन्त्राणां कृताः अर्थाः एक-समानाः न भूत्वा अनेके समजायन्त। यथा सायणभाष्यरूपे, उव्वटभाष्यरूपे, महीधरभाष्यरूपे, दयानन्दभाष्यरूपे इत्यादीत्यादिरूपेषु। वैदिक-भाषायाः वास्तविक-ज्ञाता तु वेद-मन्त्राणाम् एकम् एव अर्थं करिष्यति, अनेकान् अर्थान् नैव।[2]

1. तर्को वितर्को वा (सं)
2. 'धातूनामनेकार्थत्वात्' 'नानार्थकोशसत्त्वात्' 'पिण्डब्रह्माण्डयोः साम्यात्' 'सर्वज्ञानमयो हि सः' इत्याद्युक्तेश्च अर्थदर्शने वैषम्यं तु सम्भवति- इति सविनयं निवेदनम् (सं.)।

अहं मां वैदिक-भाषां शिक्षयितुं नैक-वैदिक-विद्वद्भिः सम्पर्कं साधितवान्। परन्तु कश्चित् अपि एतदर्थम् उद्यतः एव न समजायत। सञ्जायेत अपि कथम्? सः स्वयम् एव वैदिक-भाषां न जानाति, वेद-मन्त्राणां यम् अर्थं सः करोति, तं तु स्वकीयेन अटकलेन करोति अथवा पूर्वोक्तभाष्याणाम् आधारेण करोति।

विना व्याकरण-सहायतां काचित् अपि अज्ञाता अथवा दैनिक-व्यवहारे अप्रचलिता भाषा कदापि केनापि प्रकारेण न शिक्षितुं शक्यते, न च शिक्षयितुम् एव शक्यते-इदं सर्वथा सर्वदा निर्विवादं सत्य-सिद्धम् अस्ति। अहं वैदिक-भाषा-शिक्षकं व्याकरणस्य ईदृशं पुस्तकम् अभिलषामि यथा संस्कृत-भाषां शिक्षयितुं पाणिनीयं व्याकरणम् आधृत्य एव अन्यान्य-भाषासु लिखितानि व्याकरणस्य नैकानि असंख्यानि पुस्तकानि उपलभ्यन्ते। पाणिनि-व्याकरणस्य यथा शब्दरूपावलिः धातुरूपावलिः च पुस्तक-रूपे सुलभ्येते तथा एव वैदिक-शब्दरूपावलिः वैदिक-धातुरूपावलिः च मया पुस्तक-रूपे अभिलष्येते।

पाणिनि-व्याकरणं यथा शब्द-धातु-रूपाणां निर्माण-विधिं निर्दिशति तथा एव वैदिक-शब्द-धातु-रूपाणां निर्माण-विधेः निर्देशकं व्याकरणम् अहं वाञ्छामि। पाणिनीयं व्याकरणं यथा धातुभिः सह कृत्य-कृत्-प्रत्ययान् संयोज्य शब्द-निर्माण-रीतिं दर्शयति, तैः शब्दैः च सह तद्धित-प्रत्ययान् योजयित्वा नूतनार्थ-द्योतक-शब्द-निर्माणस्य अपि विधिं निर्दिशति, तथा एव विधेः दर्शकं वैदिक-व्याकरणं मह्यं समीप्सितम् अस्ति। वैदिक-शब्दरूपावलिः तथा भवतु, यत्र त्रिषु लिङ्गेषु सप्तसु विभक्तिषु त्रिषु वचनेषु च शब्दानां रूपाणि दत्तानि स्युः।

एवम् एव वैदिक-धातुरूपावलिः अपि तादृशी भवेत् एव, यत्र दश-गणीय-धातूनां रूपाणि दशसु लकारेषु, त्रिषु पुरुषेषु त्रिषु वचनेषु च भवेयुः। अत्र वैदिक-धातु-रूपावल्याम् एषां धातूनां रूपाणि ण्यन्त-सन्नन्त-यङन्त-यङ्लुगन्त-प्रक्रियासु अपि दशसु लकारेषु, त्रिषु पुरुषेषु त्रिषु वचनेषु च भवेयुः एव। सह एव इह वैदिक-धातु-रूपावल्यां भाववाच्ये कर्मवाच्ये च अपि सर्वेषां धातूनां रूपाणि दशसु लकारेषु, त्रिषु पुरुषेषु त्रिषु वचनेषु च वाञ्छितानि सन्ति।

परस्मैपदेभ्यः आत्मनेपदेभ्यः च धातुभ्यः पूर्वं यथा उपसर्ग-विशेषस्य संयोजनेन संस्कृते तेषां धातूनां पद-परिवर्तनं निर्देष्टुं पाणिनीय-व्याकरणे परस्मैपद-प्रक्रिया आत्मनेपदप्रक्रिये च वर्तेते तथा एव वैदिक-व्याकरणे अपि इमे द्वे प्रक्रिये अपेक्ष्येते।

पाणिनिधातु-पाठवत् एव अहं वैदिक-धातु-पाठम् अर्थ-सहितं कामये।

इयत्-सर्व-सामग्री-द्योतक-व्याकरण-ज्ञानं विना वैदिक-भाषायाम् अधिकारः सर्वथा असम्भवः एव अस्ति।

वैदिक-भाषायाः शब्दानां ज्ञानाय वैदिक-शब्द-कोषाः अपि परमावश्यकाः सन्ति। अमरकोष-हलायुध-कोष-मेदिनीकोष-विश्वकोष-हेमकोष-प्रभृति-पद्यबद्ध-कोषाः अनेके संस्कृते यथा उपलब्धाः सन्ति तथा एव मह्यं पद्य-बद्धाः वैदिक-शब्द-कोषाः वाञ्छिताः विद्यन्ते।

सम्प्रति मम अस्याः लघु-जिज्ञासायाः पाठकाः एव विद्वद्-विभूतयः मह्यं मार्गं निर्देष्टुं कृपां कुर्वन्तु यत् अहं कस्याः व्यक्तेः कस्माद् व्याकरण-पुस्तकात् वा स्वयम्पाठिरूपे वैदिक-भाषां शिक्षेय?

मम अपेक्षायाः अनुरूपं वैदिक-भाषा-व्याकरणस्य वैदिक-शब्द-कोषाणां च नामानि प्राप्ति-स्थानानि च निर्देष्टुम् अहम् अनेक-वैदिक-विदुषः न्यवेदयं सविनयं, परन्तु ततः उत्तराप्राप्त्या निराशः एव विद्ये।

मम अयम् उत्कटाभिलाषः वर्त्तते यद् वैदिक-भाषां शिक्षित्वा अहं तत्र इयतीं दक्षतां प्राप्नुयां यत् यतः वेद-मन्त्राणां वास्तविकम् अर्थं ज्ञातुं प्रभवेयं तथा अस्यां वैदिक-भाषायां स्वकीय-मनोभावान् अपि निर्बाध-रूपेण अभिव्यक्तान् कर्त्तुं शक्नुयाम्। अहं संस्कृत-भाषायाम् इव वैदिक-भाषायाम् अपि गद्ये निबन्ध-पत्र-कथोपन्यास-नाटकानि, पद्ये च काव्यानि लेखितुम् इच्छामि, किन्तु इदं तदा एव सम्भवति, यदा वैदिक-भाषायां मम सर्वतोमुखी अधिकारः भवेत्।

मम पूज्य-पितृपाद-महामहिम-राष्ट्रपति-सम्मानित म.म. पण्डित-श्रीनवलकिशोर-काङ्कर-महानुभावानाम् अस्यां वैदिक-भाषायाम् आसीत् पूर्णः अधिकारः। अत्र प्रत्यक्ष-प्रमाणं वरीवर्ति ऋषियुगस्य महतः अन्तरालाद् अनन्तरं वैदिक-भाषायां वैदिकच्छदःसु च तैः विरचितः अपूर्वः अद्वितीयः **'राष्ट्रवेदः'**। अस्य काङ्करार्षेय-भाष्यम् अपि तैः स्वयम् एव लिखितम् अस्ति। संस्कृते हिन्द्याम् अङ्ग्रेज्यां च सानुवादः प्रकाशितः अपि एष उपलभ्यते।

मम पितृचरणाः वैदिक-भाषायां सम्भाषणे अपि पूर्णाः निपुणाः अवर्तन्त। परन्तु अस्यां वैदिक-भाषायां भाषणं कर्त्तुं तेभ्यः केनचित् वैदिक-सम्मेलनेन अवसरः दत्तः एव न। ते वैदिक-विद्वद्भिः सह वैदिक-भाषायां वार्त्तालापं चिकीर्षन्तिस्म, परन्तु चेखिद्यते चेतः यत् तेभ्यः कश्चित् एतादृशः वैदिकः विद्वान् मिलितः एव न, यः तैः सह वैदिक-भाषायां वार्त्तालापं कर्त्तुं शक्नुयात्। तेषाम् इयं मनः कामना तदीय-जीवन-काले तु नैव पूर्णा अजायत, परन्तु देवलोके देवसभा-'सुधर्मा'-यां विराजमानाः ते अवश्यं प्रसन्नाः भविष्यन्ति, स्वकीयं शुभाशीर्वादम् अपि दास्यन्ति यदि अधुना अपि कश्चित् वैदिक-विद्वान् वैदिकभाषायां गद्य-पद्ययोः रचनां कर्त्तुं, वार्त्तालापं कर्त्तुं, मञ्चे च भाषणं कर्त्तुं स्वकीय-कलायाः प्रदर्शनं कृत्वा जनानां कृते आदर्शः बोभवीतु।

मम अतीव दुर्भाग्यम् अतिष्ठत् यत् अहं पूज्य-पितृभ्यः वैदिक-भाषां शिक्षितुं ध्यानं नैव दत्तवान्। एतत्-कृते मह्यं पश्चात्तापः जन्म-जन्मान्तरेषु अपि स्थास्यति, यदि अहं समये विद्यमाने इदानीम् अपि स्व-प्रयासेन वैदिक-भाषाम् अस्मिन् जन्मनि एव न शिक्षेय। मह्यं तु स्वापेक्षानुरूपं वैदिक-व्याकरणं वैदिक-शब्द-कोषः च मिलेताम्। पुनः अस्याः भाषायाः कश्चित् शिक्षकः मह्यम् उपलभ्येत वा न उपलभ्येत। अहं स्वयम्पाठी एव वैदिक-भाषां वैदिक-व्याकरणस्य वैदिक-शब्द-कोषस्य च सहायतया शिक्षिष्ये, अन्यान् अपि शिशिक्षून् निःशुल्कम् एव वास्तविक-वेद-प्रचार-प्रसारोद्देश्येन अवश्यं शिक्षयिष्यामि। एवम् अहं सुदृढं विश्वसिमि। केवलं परमादरणीय-विद्वद्-विभूतिपाठकेभ्यः मार्ग-निर्देशनं सोत्कण्ठं विना विलम्बं शीघ्रातिशीघ्रम् एव अपेक्षे। किं बहुना।[3]

**विद्यावैभव भवन, 29, केसर विहार,**

**जगतपुरा, जयपुर**

3. उत्कृष्टा इमे विचारा प्रारब्धसंस्कारं विना नायान्ति कस्यापि मस्तिष्के। 'राष्ट्रवेद' निर्मातु ऋतुम्भरा प्रज्ञैवै-तादृशी गुरुकृपया सुकृतौघैश्चासीत्। अतस्तेषामात्मजत्वेन सान्निध्याद् भवन्त एवात्र प्रमाणमर्हन्ति। वेदविज्ञानकुञ्जि-काया प्रकाशनवेलामनतिचिरं द्रष्टुकामोऽयं प्रणमति (सम्पादकः)।

# प्रियं भारतम्

❑ पं. रमेशचन्द्रशर्मा
व्याख्याता

सन्तः प्रसन्नाः प्रतिपादयन्ति, अध्यात्मविद्यामनिशं सदैव।।
मुक्ताः सदा नित्यमनित्यज्ञानम्, देशे मदीये प्रियभारते च।। 60।।

स्नानं जलस्य मलमोचनार्थम्, शरीरशुद्धिः भवतीह पुंसाम्।
तथैव संसारमलं सुधीनाम्, ज्ञानाम्भसि स्नानमपाकरोति।। 61।।

गीता सुगीता मम भारते च, विष्णोर्मुखाद् निःसृतममृतं च।
जनाश्च पीत्वा ससुखेन नित्यम्, न विद्यते जन्म पुनश्च तेषाम्।।62।।

एकं च गीतं प्रियकृष्णगीतम्, एका च विद्या खल्वात्मविद्या।
एकश्च देवः मम वासुदेवः, व्रजामि कृष्णं शरणं सदैव।। 63।।

जनाश्च लोके शरणं व्रजेयुः, गीतामृतं गोपसुतं मुरारिम्।
एको हि देवः प्रियकृष्णचन्द्रः, एकं हि शास्त्रं प्रियकृष्णगीतम्।।64।।

ज्ञानस्य सिन्धुः मम भारतं च, गीता सुगीता प्रियमाधवेन।
मदीयदेशे वहतीह नूनम्, ज्ञानस्य गंगा खलु मोक्षदात्री।। 65।।

न चिन्तयन्ति सुधियः कदाऽपि, नष्टे शरीरे सति मर्त्यलोके।
यथा हि वस्त्राणि च धारयन्ति, जीर्णानि त्यक्त्वा च नवानि भूयः।।66।।

पुन पुनश्चापि विवर्धते सः, आत्मा हि पुण्येन सुकर्मणा वा।
सत्कर्मयुक्ता हि जनाः सदैव, योगं च कृष्णं शरणं व्रजन्ति।।67।।

देहस्य नाशं भवतीह लोके, जीवस्य नाशं न हि जायते च।।
अस्त्रेण शस्त्रेण जलेन वापि, अजश्च नित्यः पुरुषश्च देही।। 68।।

यथा हि देहे नवयौवनं च, जरा हि बाल्यं खलु देहिनश्च।
तथैव देहस्य पुनश्च प्राप्तिः,पुनश्च नाशं खलु जायते च।। 69।।

इमे हि देहाः खलु नाशवन्तः तदात्मरूपं परमात्मनश्च।
सतश्च भावः भवतीह लोके, तत्तत्त्वरूपं प्रियकृष्णतत्त्वम्।। 70।।

सुखे च दुःखे विजये च लाभे, समं हि धीराः पुरुषाः भवन्ति।
परं जनाः ये पुरुषा अधीराः, तेषां गतिः नास्ति कदाऽपि लोके।।71।।

जनाः हि ये मूढधियश्च सन्ति, हतं च हन्तारमिमं विदन्ति।।
नायं हि भूत्वा भविता न भूयः, अजश्च नित्यो ह्यमरश्च देही।। 72।।

देहस्य यावत् खलु जन्ममृत्युः, जातस्य मृत्युः भवतिति सत्यम्।
ध्रुवं तथैवापि हि जन्म भूयः, न जन्म मृत्युः ननु देहिनश्च।। 73।।

ज्ञानेन बुद्ध्या सुकृतानि लोके, कर्माणि चैवं न विनाशयन्ति।
कार्यस्य बीजं च फलं कृतस्य, न बन्धनं नैव भयं कदाऽपि।। 74।।

ज्ञानस्य योगे इह कर्मयोगे, एका हि बुद्धिः भवति स्थिरा च।
विवेकहीना च गतिर्विभिन्ना, लोके च जाता व्यवसायिका सा।।75।।

स्वजन्ममृत्योश्च भयं कदाऽपि, पापाद्विमुक्तस्य न जायते हि।
यतो हि बुद्धिः खलु सांख्ययोगे, स्थिरा च तेषां भवतीह लोके।।76।।

सुखं च दुःखं विजयं जयं च, पराजयं न्यूनमन्यूनमेवम्।
समं हि मत्वा खलु सांख्यबुद्धिः, कदाऽपि नैव पततीह पापे।।77।।

यदा च कामान् प्रजहाति सर्वान्, मनोगतान् तान् सुविवेकयुक्तः।
सुखेषु दुःखेषु समं सदास्ति, धीरः जनः सः स्थिरबुद्धियोगी।।78।।

भोगेषु कामेषु जनाः च लिप्ताः, सदैव बुद्धिश्चपला सकामा।।
तेषां हि बुद्धिर्व्यवसायिका च, कदाऽपि गच्छन्ति न ते ह्यनामयम्।।79।।

संसारसारं खलु कृष्णतत्वम्, ईशस्य तत्वं न हि ईश्वरश्च।
परं हि परमेश्वरश्च, ईशे हि संसारगतिश्च जाता।। 80।।

106, ग्रीनपार्क, बैनाड़ रोड़
दादी का फाटक, झोटवाड़ा, जयपुर-12

## निवेदन

भारती पत्रिका कार्यालय अपने आदरणीय ग्राहकों तक प्रतिमाह समय पर पत्रिका पहुँचाने की व्यवस्था सुनिश्चित करना चाहता है। इस दृष्टि से सभी ग्राहकों से निवेदन है कि निम्नानुसार अपनी सूचनाएं कार्यालय को पोस्ट कार्ड द्वारा अथवा इसी पत्र को काट कर लिफाफे में कार्यालय के पते पर भेजने का श्रम करें। यदि उक्त प्रकार से सूचना भेजने में कठिनाई हो तो मोबाइल नं.– 09352030291/ 8947055999 पर सूचना लिखवा सकते हैं अथवा **SMS** भी कर सकते हैं।

नाम........................................... ...........पुत्र/पुत्री श्री............................भवन संख्या...........

गली/ मोहल्ला/कॉलोनी..........................................वाया/पोस्ट ऑफिस.....................................

तहसील................................जिला...............................राज्य.......................................

देश...................पिन............................................दूरभाष.........................................

मोबाईल नं............................ईमेल.....................................................................

निवेदक **सुदामा शर्मा**, प्रबन्ध सम्पादक
**भारती संस्कृत मास पत्रिका**
बी–15, भारती भवन, न्यू कॉलोनी, जयपुर–302001 (राज.) दूरभाष–2379014
ई–मेल – sanskritbharti09@gmail.com

# भारतीया संस्कृतिः

❑ डॉ. सुरेशकुमारशर्मा

सम्पूर्णे विश्वे भारतीया संस्कृतिः विशिष्टा विश्ववन्द्या सर्वग्राह्या चास्ति। अन्यदेशीया संस्कृतिर्नित्यमुत्पद्यते कालगर्भे विलीयते च। परम् अस्मद्देशीयसंस्कृतिरद्यापि स्वमूले विराजते। विश्वस्य संस्कृतिभ्यो भारतीया संस्कृतिः प्राचीनतमा खलु। एतन्निर्माणं न केनापि कर्तुं शक्यते, न चेयं काले-काले जायते विनश्यति वा। संस्कृतिर्हि मनीषिणां बुद्धिजीविनां सम्प्रदायानां च आचारविचाराणाम् आत्मसात्करणोत्तरमेव प्रसरति। प्राचीनभारतीयसंस्कृतेः प्रतीकभूता वेदमन्त्रा उपनिषदो भगवद्गीता दर्शनादीन्यद्यापि अस्माकं मनस्सु विलसन्ति।

संस्कृतिर्नाम हि - ''मनसो मलं या व्यपनयति, चेतसः चांचल्यं या निवारयति,आत्मनोऽज्ञानावरणं च या नाशयति सा संस्कृतिः।'' इति सामान्यतया ज्ञायते। संस्कृत्यैव दुर्भावानां दमनं, दुःखद्वन्द्वानां दहनं ज्ञानज्योतिषां विलसनं, सत्यं सुखं शान्तिरिति सर्वमपि प्रभवति।

विश्ववन्द्यायामस्यां भातीयसंस्कृत्यां धर्मप्राधान्यम्, आध्यात्मिकी भावना, पारलौकिकी भावना, सदाचारपालनं, वर्णाश्रमव्यवस्था, पुरुषार्थाः, कर्मवादः, पुनर्जन्मवादो, यज्ञस्य महत्त्वं, तपोमयं जीवनं अहिंसापालनं त्यागमहत्त्वमिति सर्वा एव मूलभूता भावनाः समुपलभ्यन्ते। इयं संस्कृतिः, बहुभिः पूज्यपुरुषैः, अवतारपुरुषैः, दार्शिनिकैः, धार्मिकैश्च पुरुषैः नितरां प्रभाविता, समृद्धा विकसिता च। एतान् सर्वान् प्रति समादरणमेवास्माकं संस्कारः। उक्तं च-

**अभिवादनशीलस्य नित्यं वृद्धोपसेविनः।**
**चत्वारि तस्य वर्धन्ते आयुर्विद्यायशोबलम्।।**[1]

**''मातृदेवो भव, पितृदेवो भव, आचार्यदेवो भव''**[2] इत्येतेषां देववत्पूज्यत्वम् आख्यायते। मातुः पितुर्गुरूणां चादेशोऽनवरतं पालनीयः, तेषामाज्ञानुसारमेव वर्तितव्यम्। इयमेवास्माकं संस्कृतिः।

भारतवर्षे विभिन्नसम्प्रदायानां, विविधभाषाणाम्, अनेकदेवानां, भिन्नभिन्नानां दर्शनानां च प्रचारः प्रचलत्येव। अथापि भारतीयानां ''**भिन्नत्वे एकत्वमिति**'' कथनं सर्वेष्वपि क्षेत्रेषु दृश्यते। सर्वेष्वपि क्षेत्रेषु अनेकतां पश्यन्तोऽपि एकत्वं प्रति समन्वयात्मक-दृष्टिप्रसरणमेव भारतीयतायाः वैशिष्ट्यम्। यथेयं संस्कृतिः समन्वयात्मकभावनान्विता तथैव विश्वबन्धुत्वभावना-युक्ताऽपि। ''**वसुधैव कुटुम्बकम्**''[3] इति अस्याः संस्कृतेर्गानमस्ति। सर्वेषां जीवानां सौख्यं मङ्गलकामनां च भारतीयैव संस्कृतिः करोति। तथाहि-

**न त्वहं कामये राज्यं न स्वर्गं नापुनर्भवम्।**
**कामये दुःखतप्तानां प्राणिनामार्तिनाशनम्।।**[4]

**वैदिकयुगीना संस्कृतिः** - सृष्टेरादिकाले वेदमाश्रित्यैव जनानां कर्मविभागो वस्तूनां नामनिर्धारणादिकं चाऽभवत्। प्राचीनतमायाः संस्कृतेः स्वरूपमिहोपलभ्यते। जनानां सामाजिकी आर्थिकी धार्मिकी राजनीतिकी च स्थितिः काऽऽसीत्, कं क्रियाकलापमन्वतिष्ठन् मानवा इति सर्वं वेदाध्ययनेन ज्ञातुं शक्यते। वैदिकी संस्कृतिरेव प्रथमा संस्कृतिरासीत्।

**''सा प्रथमा संस्कृतिर्विश्ववारा''**[5] इति

वैदिककालिकानां जनानां निसर्गतः पित्रादिगुरुजन-पराधीनवृत्तित्वनियमात् तदानींतनानां तत्तद्वर्गाणां भरण-मप्यशेषतो राजायत्तं बभूव। राजानोऽपि प्रायेण कुल-

क्रमागता एव बभूवुः। धर्मतः प्रजानां पालनमेव राज्ञः कर्त्तव्यम्। प्रजाश्च तदाज्ञावशवर्तिन्यः तस्य जीविकार्थं यथाभिलषितं बलिं प्रांजलयः, प्रणतिशिरसश्चोपाहरन्। सर्वाणि राजकार्याणि जनसमित्यां निर्णीतानि भवन्ति स्म। तदनुरोधेन राजानो राज्यं चक्रुः। संग्रामेषु राजैवाग्रेसरो बभूव। युद्धप्रस्थानादिकाले स्वपक्षीयस्य क्षेमलाभाय स्वयम् आचार्यमुखेन वा यज्ञाद्यनुष्ठानमपि राज्ञ एव कृत्यं बभूव।

**रामायणकालीना संस्कृतिः**- संस्कृतसाहित्ये श्रीमद्रामायणमादिकाव्यमास्ते। उदात्तं रीतिप्रबोधकं चेदं महाकाव्यं परमोन्नतास्पदं विभ्रद् उत्तमोत्तमं काव्यमिति सर्वैः ज्ञायत एव।

**वेदवेद्ये परे पुंसि जाते दशरथात्मजे।**
**वेदः प्राचेतसादासीत् साक्षाद्रामायणात्मना।।**[6]

इति स्कन्दपुराणवचनानुगुणं वेदप्रतिपाद्ये परमपुरुषे दशरथात्मजत्वेनाऽवतरिते, वेदः वाल्मीकिमहर्षेः मुखारविन्दात् श्रीमद्रामायणरूपेणावतरित इति ज्ञायते। अतो सकलधर्ममूलेन वेदेन सह रामायणस्य तुल्यत्वं सिद्धम्। काव्यमिदमादृत्य संस्कृतसाहित्ये बहूनि दृश्यानि श्रव्यानि च काव्यानि तत्तत्कविभिर्विरचितानि सम्प्रति लसन्ति। संस्कृतवाङ्मये रामायणापेक्षया सकलजनप्रिया नान्या काचिद् वाङ्मयसृष्टिरद्यावधि दृश्यत इति, रामायणमिव मानवजीवनसरणिं मनोभावनां च प्रभावयन्ती।

**महाभारतकालीना संस्कृतिः**- संस्कृतसाहित्यस्यैव न अपितु विश्वसाहित्यस्य विशालतमं ग्रन्थरत्नमस्ति 'महाभारतम्'। अत्र कौरवपाण्डवानामाख्यानं विशिष्य भारतसंग्रामः सुविशदरूपेण वर्णितः। 'महत्त्वात् भारवत्त्वात् च महाभारतमुच्यते' इति केचित्, भारतयुद्धस्य वर्णनादेवास्य महाभारतमिति संज्ञा प्रथिता इति अपरे वदन्ति। महाभारतमिदं तत्कालीनभारतवर्षस्य राष्ट्रियविश्वकोश इव चकास्ति। अत एवोक्तं स्वयमेव ग्रन्थकृता-

**धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ।**
**यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्।।**[7]

इति भारतीयदार्शनिकग्रन्थानां मुकुटमणिः 'श्रीमद्भगवद्गीता' अस्यैवाङ्गभूता। अनेनैव गीतामृतेन कृष्णद्वैपायनो वेदव्यासः च पांचरात्रभागवतधर्मं प्रावर्तयत। अर्थनीतेः राजनीतेः अध्यात्मशास्त्रस्य च विषयाणां समावेशेन महाभारतमिदं भारतीयधर्मज्ञानस्य तत्त्वज्ञानस्य च विश्वकोशतां गतम्। महाकाव्यस्यास्य शान्तिपर्व मानवजीवनस्य समस्यानां समाधानं करोति।

इत्थं महाभारतकालिकः सम्पन्नः समुन्नतः प्रगतिपूर्णश्च समाजः आर्थिकः-बौद्धिकः-आध्यात्मिकः-नैतिकः-सामाजिकः-राजनैतिकः सर्वात्मना विकसितः सन् तात्कालिकसंस्कृतेश्चाभ्युत्थानद्योतकोऽभूत्। महाभारतस्य माहात्म्यं स्वयं वेदव्यासो महामुनिरेवमाह-

**अष्टादश पुराणानि धर्मशास्त्राणि सर्वशः।**
**वेदाः साङ्गास्तथैकत्र भारते चैकतः स्थितम्।।**[8]

गीताप्रवचनेन धर्माधर्मयोर्भिन्नता, निष्कामकर्मयोगः, स्वधर्मनिर्वहणं चेत्युपदेशा अद्यापि अस्मत्संस्कृतिं विशुद्धां कुर्वन्ति। वस्तुतस्तु फलापेक्षां विना कर्माचरणमेव कर्मयोगः। कर्मयोगानुसरणेन सुखदुःखे, लाभालाभौ, जयाजयौ समानाविति भावना जायते। कर्मयोगी न कदापि दुष्कर्म कुरुते। सत्कर्मकरणेऽपि फलं नापेक्षते। बुद्धिं निर्मलां कृत्वा, एकाग्रचित्तेन निष्कामकर्मसम्पादनमेव मानवकर्त्तव्यम्।

**कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।**
**मा कर्मफलहेतुर्भूर्मा तेऽसङ्गोस्त्वकर्मणि।।**[9]

निष्कामकर्मानुष्ठानपरतया गीतोपदेशो निष्कामकर्म-दृष्ट्या स्वधर्मनिर्वहणमेव गीतोपदेशसारः। अत एव महाभारतकालीना संस्कृतिः धर्माधारिताऽऽसीत्। उक्तं च- '**यतो धर्मस्ततो जयः।**'[10] धर्म एव भारतीयसंस्कृतेः प्राणः। समाजस्य धारणं पोषणं चायमेव करोति। असावेव मानवकल्याणं मोक्षाख्यं पुरुषार्थं च साधयति। समस्तमपि विश्वं सूत्रेणैकेनायमेव बध्नाति।

**अधुनातनसंस्कृतिः-** भारतदेशेऽनेके प्रान्ताः सन्ति। तेषां सर्वेषां भाषाः वेशभूषाः जीवनशैली च भिन्नाः सन्ति तथापि देशप्रेमभावनया मानवकल्याणभावनया च भिन्नतायामेकता दृश्यते। प्राक्कालादेवास्माकं देशः कृषिप्रधानोऽस्ति। अधुनापि 75 प्रतिशतं जनाः कृषिकार्योपरि निर्भराः सन्ति। यद्यपि अस्माकं संस्कृतेः उपरि पाश्चात्य-संस्कृतेः प्रभावोऽपतत् तथापि भारतीयः समाजः स्वसंस्कारान् न विस्मृतवान्। प्रेमभावना, दया, धर्मः, सहिष्णुता, क्षमा, शौचं, सत्यम्, अहिंसाऽस्तेय-मित्यादयः गुणाः अधुनापि जनानां हृदयेषु विराजन्ते। इत्थं भारतीयसंस्कृतिः विश्वे आदर्शरूपेण प्रतिष्ठिताऽस्ति।

**सन्दर्भसूची-**

1. मनुस्मृतिः 2.121, 2. तैत्तिरीयोपनिषद्-शिक्षावल्ली 11.1, 3. महोपनिषद् 4.71, 4. श्रीमद्भगवद्गीता, 5. यजुर्वेदः 7.14, 6. श्रीरामरक्षास्तोत्रम्, 7. महाभारतम्, 8. महाभारतम्-स्वर्गारोहणपर्व, 9. श्रीमद्भगवद्गीता 2.43, 10. महाभारतम्-उद्योगपर्व

**सहायक आचार्य, संस्कृत**
**राजकीय कन्या महाविद्यालय, चूरू**

# संस्कृतश्लोकमन्दाकिनी

❑ **डॉ. प्रमोदकुमारशर्मा (शास्त्रकविः)**

**को लोके व्ययते कालं जीवानां हितकाम्यया।**
**नित्यं निस्स्वार्थभावेन स्वकीयमात्मतृप्तये।। 1।।**

**आकाशो व्ययते कालं वायुरग्निर्जलं तथा**
**पृथिवी सर्वतो नित्यं प्राणिनां हि हितेच्छया।। 2।।**

**समग्रा प्रकृतिर्नित्यं लोकनिर्माणहेतवे**
**व्ययते समयं मित्र ! सर्वे जानन्ति देहिनः।। 3।।**

**व्ययतां व्ययतां मित्र ! जीवनं सर्वमेव हि।**
**परेषामुपकारार्थमेष धर्मस्सनातनः।। 4।।**

**व्ययाञ्चक्रे सुधीः रामः प्रजापालनपूर्वकम्।**
**स्वकीयं समयं सर्वमानन्देन पुनः पुनः।। 5।।**

**कथं त्वं व्ययसे भ्रान्तः व्यर्थं संसारकर्मसु।**
**व्ययिष्यते कदा कालं शास्त्रज्ञानाय जीवने।। 6।।**

**सांसारिकेषु कार्येषु यः कालं व्ययते सदा।**
**कथं तस्य मनो मान्याः! शास्त्रेषु रंस्यते बुधाः।। 7।।**

**व्याकरणस्य विद्वांसः शास्त्राणां चिन्तने यथा।**
**व्ययन्ते समयं नित्यं तथाऽन्ये के विचिन्त्यताम्।। 8।।**

**दुष्टाः सम्भूय व्यर्थं ते कर्मणि लोकनिन्दिते।**
**व्ययन्ते समयं मित्र ! क्षणिकानन्दहेतवे।। 9।।**

**दृष्ट्वोच्छृंखलतां गतं स्वतनयं वृद्धः पिता वायति।**
**मोहः केवलमेव तं विचति यो दुःखस्य हेतुः सदा।।**
**एवं च व्यथते स विध्यति शिरः किंचिन्न कर्तुं क्षमः।**
**तूष्णीं रोदिति केवलं व्ययति सः स्वायुर्निमग्नः शुचिः।।10।।**

**सन्दर्भः- व्यय गतौ, भ्वा. उभयपदी, सेट्, सकर्मकः।**
**अर्थः-बिताना, घटना।।**

**व्याकरणविभागाध्यक्षचरः, व्याकरणविभागे सहाचार्यः,**
**ज. रा. रा. सं. विश्वविद्यालयस्य,जयपुरस्थस्य**

राष्ट्रपितुर्महात्मगान्धिनो 150 तमजयन्त्युपलक्ष्ये -

# गान्धिगीतम्

❑ मिश्रोऽभिराजराजेन्द्रः

पराधीनतातमसि यदाऽऽसीन्मग्नं भारतराष्ट्रम्।
स्वयंज्योतिषा तदा केनचिल्लग्नमभूत्सौराष्ट्रम्।। 1।।
प्रथमवारमिह वैधससृष्टौ पश्चिमनीलाकाशे।
उदितोऽभूत्कश्चिद्दिवाकरो मासे कमलविलासे।। 2।।
**आनर्ताख्ये** विमलजनपदे मङ्गलवृत्तसमृद्धे।
जलनिधिवेलालालितचरणे सुभगव्यतिकरसिद्धे।। 3।।
पोरबन्दरे सौख्यमन्दिरे कर्मचन्दपरिवारे।
लेभे जनिं स मोहनदासो रसो यथा कह्लारे।। 4।।
को नु वेद यदयं भवति किल राष्ट्रपिता जननेता।
अनाचारघस्मरयुद्धानां शस्त्रविहीनो जेता।। 5।।
महामहिमशाली वामन इव स खलु विलक्षणबालः।
शक्तिमदान्धधवलकृत्तीनामभवत्कालव्यालः।। 6।।
सत्याऽहिंसाऽसहयोगत्रितयेन पदन्यासेन।
मितवान्निखिलभूतलं गान्धी केवलमात्मबलेन।। 7।।
यदचिन्तयत्तदेव जनानां कृतेऽभवत्करणीयम्।
यदवोचन्मन्त्रात्मकसत्यं जातं तद्वरणीयम्।। 8।।
अमृतसिद्धियोगोऽसौ जातः यस्मिन् क्षणे प्रतस्थे।
राष्ट्रमलोकि हन्त निस्पन्दं शान्तो यदाऽवतस्थे।। 9।।
यत्राऽगच्छत्सोऽभून्मार्गो लक्षकोटिगमनीयः।
यच्चकार तद्व्रतं पवित्रं जातं सदसि महीयः।। 10।।
भारतराष्ट्रं पृथुकलेवरं तस्यात्माऽभूद् गान्धी।
कोटि-कोटि दीनार्तजनानां परमात्माऽभूद् गान्धी।।11।।
सत्याग्रहं प्रयुज्य शस्त्रमिव दुराचारदर्पघ्नम्।
विजयमवाप्य दक्षिणाऽफ्रीकाभूमौ ध्वंसितविघ्नम्।। 12।।
शक्तिदुर्मदं निखिलभूतलं कृत्वा विस्मयलीनम्।
महासमरविजयी गान्धी भारतमागच्छद् दीनम्।। 13।।
महामोहनिद्रावशङ्गता विस्मृतविगतैश्वर्या।
जनता यत्र जिजीव जीवनं पशुतुल्यं हतवीर्या।। 14।।
भुवि निपत्य वदनोदरदर्शनकुशला यत्र नृपालाः।
श्वान इवासन् पिण्डदगौराङ्गानामाज्ञापालाः।।15।।

भिन्नबुद्धयो भिन्नरहस्याः स्वार्थसिद्धिसुखविद्धाः।
राष्ट्रप्रणयमुपेक्ष्य परस्परमनुदिनमेव विरुद्धाः।। 16।।
दास्यनिगडजटिलेऽपि भारते न मनागपि ते विद्धाः।
गौराङ्गप्रभुचरणचारणा आसन् मुक्तिविरुद्धाः।। 17।।
स्वाभिमानिनो राष्ट्रसेवका दास्योन्मूलनरक्ताः।
इन्कलाववादिनश्शातिता नित्यमेव भूभक्ताः।। 18।।
सर्वमिदं निपुणं निरीक्ष्य जनतार्तिविदारणकामः।
सञ्चक्लृपे मोहनदासो राष्ट्रोद्धाराय ललामः।। 19।।
स्वाधीनतासमरपुत्रं धृत्वा करयोस्सेनानी।
आजुहाव गौराङ्गकदर्यान् रणभूमावतिमानी।। 20।।
ग्रामे-ग्रामे नगरे-नगरे पथि-पथि भारतखण्डे।
प्रजज्वाल दास्योन्मूलनदक्षोऽग्निः मुण्डे-मुण्डे।। 21।।
रौलटबिल्-साइॅमनकमीशन्-सर्वमिदं प्रतिरुद्धम्।
असहयोगभावनया सर्वत्रापि घोषितं युद्धम्।। 22।।
न्यायालयं जहुर्वाक्कीला गुरवः शिक्षास्थानम्।
अधिकारिणो जहुर्नृपसेवां प्राज्ञा नृपसम्मानम्।। 23।।
राष्ट्रकृते परमेश्वरवागिव मतो गान्धिनिर्देशः।
कोणे-कोणे भरतधरायाः शिरोधार्यसन्देशः।। 24।।
हतप्रभं गौरङ्गशासनं निष्क्रियमिव सञ्जातम्।
दर्शं दर्शं निजसुखसौधे दारुणकुलिशनिपातम्।। 25।।
कान्दिशीकबुद्धिभिस्तैस्तदा दमनचक्रमनुयातम्।
प्रतिवृक्षं शूलं प्रतिभवनं कारागारं जातम्।। 26।।
नैव चचाल चकम्पे गान्धी नो वाऽत्यजत्स्वधैर्यम्।
महामंत्रमुद्घोष्य नवीनं विदधे स्वजने स्थैर्यम्।। 27।।
अपसारय दासताकलङ्कं धर्मोऽयं भवदीयः।
कुरु किञ्चिन् म्रियतामथवा पन्था नान्योऽस्ति तृतीयः।।28।।
धर्मोऽयं मंत्रोऽयं भवतामेषा गान्धीवाणी।
परतंत्रा न स्थास्यति सम्प्रति भारतभूः कल्याणी।। 29।।
पायं पायं राष्ट्रपितुर्वचनामृतमेतदमोघम्।
निखिलमेव राष्ट्रं सञ्जातं दीपितकण्ठविरोधम्।। 30।।

अङ्गबङ्गकाशीकोसलचम्पारनविन्ध्यकलिङ्गाः
आन्ध्रतमिलकर्णाटकेरला गुर्जरमरुभूसंघाः।। 31।।
असम-पञ्चनद-हिमगिरिशिखराश्चक्रन्दुस्समवेताः।
आंग्लशासका जहित भारतं जहित जहित भो प्रेताः।।32।।
सुखिनी धरा भवत्वस्माकं विश्वबन्धुतालीना।
सौराज्यं स्वातन्त्र्यं विलसतु कीर्तिर्भवतु नवीना।। 33।।
धर्मकलासंस्कृतिसमुपेतं विलसत्प्राघुणमानम्।
अलंकरोतु पुनर्मे राष्ट्रं विश्वगुरोर्महिमानम्।। 34।।
सङ्केतं गान्धिनोऽवाप्य सर्वेऽपि भारतीभक्ताः।
शासनसेवां जहुर्झटिति वैदेशिकवेषविरक्ताः।। 35।।
स्थाने-स्थाने वैदेशिकवस्त्राणां दहनं जातम्।
वीता निशाऽवमानकारिणी दृष्टं नवप्रभातम्।। 36।।
मुष्टिमिता निजराष्ट्रमृत्तिका स्वर्णमयी सञ्जाता।
विश्वमानचित्रेऽवलोकिता महिता भारतमाता।। 37।।
बर्बराङ्ग्लशासनं धिक्कृतं निखिले खलु संसारे।
स्वाधीनता-मन्दरो ददृशे नृपनय-पारावारे।। 38।।
शतसहस्रसंख्यका निगडिता मुक्तिसमरयोद्धारः।
निष्कासिताः शातिता निहता मुक्त्यध्वरहोतारः।। 39।।
सर्वस्वं लुण्ठितं पिशाचैर्विहिता अत्याचाराः।
व्याप्ता दिक्षु-विदिक्षु भारते क्रन्दनहाहाकाराः।। 40।।
यावच्छक्यं विहितमकृत्यं पाशविकं विकरालम्।
निर्वापितो न मुक्तिमखाग्निस्तदपि विकीर्णज्वालम्।।41।।
अभ्रंलिहशिखरस्समदृश्यत हिमाचलो ननु गान्धी।
निरवधिगहनगभीरोऽलक्ष्यत महासागरो गान्धी।। 42।।
आंग्लानां सुभगम्मन्यानां कृतेऽति गूढो गान्धी।
चक्रव्यूहसन्निभो जटिलोऽभून्निर्व्यूढो गान्धी।। 43।।
अभितः परितो हन्त सर्वतो ब्रिटिशशासनं गान्धी।
नीचैरुपरि दक्षिणे वामे गौराङ्गानां गान्धी।। 44।।
मृतो यथा जीवन्नपि लङ्कापती राघवाऽतङ्कात्।
ब्रिटिशशासनं ननु विध्वस्तं तथा मोहनाऽतङ्कात्।।45।।
श्वसनमप्यभूद्दुष्करमेषां प्रसरत्थूथूत्कारे।
खद्योतानां यथा दुर्दशा दिवसे प्रभाप्रसारे।। 46।।

शुद्धं बुद्धं बद्धपरिकरं वीक्ष्य भारतं स्फीतम्।
समादधुश्शासका यदधुना वैभवदिवसं वीतम्।। 47।।
कण्ठीरवपोतका भारतीपुत्रा दिशि ढौकन्ते।
कथमेते गोमायुशासनं क्षणमपि हन्त सहन्ते।। 48।।
तस्माद् वरमधुनाऽऽत्मरक्षणं हित्वा भारतदेशम्।
नाट्येऽवसिते शैलूषोऽपि त्यजति हैतुकं वेषम्।। 49।।
एवमादि निर्णीय मनसि घोषितवन्तः स्वातन्त्र्यम्।
भारतराष्ट्रमभूद् दासतामुक्तं भूतलवन्द्यम्।। 50।।
शैलजलधिरसचन्द्रमिते ख्रिस्ताब्देऽप्यगस्तमासे।
पञ्चदशे दिवसेऽथ निशीथे स्वाधीनता बभासे।। 51।।
ध्वजस्त्रिवर्णो मुक्ताकाशे दोधूयतेस्म चित्रम्।
भारतराष्ट्रभविष्यमङ्गलं व्यतरत् परमपवित्रम्।। 52।।
संकल्पं परिपूर्य निर्वृतिं परमामवाप गान्धी।
राष्ट्रपितेति बोधितस्सर्वैः सुषमामवाप गान्धी।। 53।।
मुक्तिं दत्वा मुक्तिदूतगरिमाणं यातो गान्धी।
मनुजस्सन्नपि वृन्दारकमहिमानं यातो गान्धी।। 54।।
हत्वा ननु समाजवैषम्यं समतां प्रददे गान्धी।
समालिङ्ग्य ननु दीनदरिद्रान् प्रियतां विदधे गान्धी।। 55।।
सर्वधर्मसमभावमुपचरन् मृदुतां लेभे गान्धी।
सर्वोदयसन्देशं वितरन् सुरतां लेभे गान्धी।। 56।।
भारतीयसंस्कृतेः सौरभं जगति व्यतरद् गान्धी।
अजराऽमरं विधाय भारतं परिमुक्तोऽभूद् गान्धी।। 57।।
भूत्वा नरोऽपि नारायणतां कृत्यैरवाप गान्धी।
आत्मानं प्रविकीर्य पुष्पतां गन्धैरवाप गान्धी।। 58।।
सञ्जातोऽपि गुर्जरे राज्ये भारतमभवद् गान्धी।
जगत्प्रपञ्चेऽप्यासक्तः सत्यामृतमभवद् गान्धी।। 59।।
**मिश्रोऽभिराजराजेन्द्रो** देववाणीसमर्चकः।
विश्वविद्यालये रम्ये शिमलायां प्रतिष्ठिते।। 60।।
समादृत्य सुहृद्वाक्यं गौतमीयं विकस्वरम्।
गान्धिगीतमिदं प्रीतं सद्यो व्यरचयन्मुदा।। 61।।
शरग्रहग्रहेन्द्वब्दे ख्रैस्ते मासि दिसम्बरे।
प्रणीतं सप्तविंशेऽह्नि गान्धिगीतमिदं मया।। 62।।

**पूर्वकुलपतिः ( शिमला )**

# कालिदासदृष्ट्या आदर्शशिक्षकः

❑ अनुसन्धाता देवकरणः शर्मा

नित्यं देदीप्यमानेषु रत्नेषु अलौकिकरत्नं महाकवि-कालिदासः। तस्य च नाम्ना लब्धप्रतिष्ठिते अखिल-भारतीयकालिदाससमारोहे महत्याः प्रसन्नतायाः विषयोऽयं यत् तत्सम्बद्धसाहित्येषु आदर्शशिक्षकचिन्तनम्।

'काल्याः दासः' इति कालिदासः। सर्वे जानीयुः यत् उज्जयिन्यां 'गढकाली देवी' कालिदासस्य इष्टदेवी। अपरमतानुगुणं महाकालः अस्य महाकवेः आराध्यदेवः। अनेन ज्ञायते यत् अस्य आचार्यस्य शिवशक्त्योः अखण्ड-विश्वासः, विश्वासे च श्रद्धा भवति। शास्त्रेषु लिखितम्'श्रद्धावान् लभते ज्ञानम्'।

श्रद्धा शिक्षकस्य सर्वश्रेष्ठगुणः।

आचरणेन दर्शयति यः सः आदर्शः। 'शिक्ष्' धातुना 'वुन्' प्रत्यये कृते सति 'शिक्षकः' इति पदं निष्पन्नं भवति। शिक्षयति अध्यापयति यः सः शिक्षकः। यं दृष्ट्वा अन्ये अनुकुर्वन्ति अत्र अनयोः पदयोः आदर्शः विशेषणं शिक्षकश्च विशेष्यं वर्तेते।

पुरा आचार्येण परम्परया अपाठ्यत। अरण्ये वेदाश्रमाः आसन्। तादृशेषु निर्जनेषु क्षेत्रेष्वपि बटवः पितृतुल्यस्य आचार्यस्य सकाशात् भयं न आप्नुवन्। कारणं स्पष्टं वर्तते सः आचार्यः सर्वशास्त्रनिष्णातः सर्वगुणसम्पन्नः सर्वान् शिष्यान् पुत्रवत् पालयन् अशोभत। तस्याम् आचार्यपरम्परायां भगवत्याः वाग्देव्याः वरदपुत्रः कविकुलगुरुकालिदासः अन्यतमः। गच्छता कालेन इयं गुरुपरम्परा तथा च शिष्यपरम्परा मार्गान्तरिता। भवतु नाम।

तथापि साम्प्रतम् आदर्शशिक्षकस्य ये मानदण्डाः स्वीक्रियन्ते तेषाञ्च सर्वेषां निर्विवादं प्राक्कल्पनम् आचार्यस्यास्य विद्योत्तमायाः ईशस्य साहित्ये दरीदृश्यते।

शोधपत्रेऽस्मिन् विहंगावलोकन्यायेन मया किञ्चित् उच्यते। ते बिन्दवः सन्ति-

1. शिक्षकः व्यावहारिकः भवेत्।
2. शिक्षकः सहृदयः स्यात्।
3. शिक्षकस्य वक्तव्यं सरलं, स्पष्टं, सारगर्भितं स्तरानुगुणञ्च स्यात्।
4. शिक्षकः शिक्षणविधिज्ञः स्यात्।
5. शिक्षकः शिक्षणसूत्रज्ञः स्यात्।
6. शिक्षकः विषयज्ञः स्यात्।
7. स्वकीयाध्यापने शिक्षणसहायकसामग्रीणाम् उपयोगं कुर्यात्।
8. सः विनम्रो भवेत्।
9. शिक्षणसिद्धान्तवेत्ता भवेत्।
10. मूल्याङ्कनपद्धतिपटुः स्यात्।

**शिक्षणसिद्धान्ताः यथा-**

1. स्वाभाविकतायाः सिद्धान्तः।
2. क्रियाशीलतायाः अभ्यासस्य च सिद्धान्तः।
3. रुचेः सिद्धान्तः।
4. स्वतन्त्रतायाः महत्त्वस्य सिद्धान्तः।
5. प्रयत्नस्य सिद्धान्तः।
6. बाल्यावस्थायाः महत्त्वस्य सिद्धान्तः।
7. चयनस्य विभाजनस्य च सिद्धान्तः।
8. अनुकरणस्य एवं स्वयं संशोधनस्य सिद्धान्तः।
9. मौखिकप्रवचनस्य सिद्धान्तः।

**पद्धतयः यथा -**

1. व्याकरण-पद्धतिः।
2. विश्लेषणात्मक-पद्धतिः।
3. व्याख्या-पद्धतिः।
4. अनुवाद-पद्धतिः।
5. प्रत्यक्ष-पद्धतिः।
6. हरवर्टीयपञ्चपदी

(1) प्रस्तावना
(2) विषयोपस्थानम्
(3) तुलना
(4) सामान्यीकरणम्
(5) प्रयोगः

7. पाठ्यपुस्तक-पद्धतिः।
8. निर्बाध-पद्धतिः।
9. प्राचीनानाम् अर्वाचीनानाञ्च पद्धतीनां समन्वयः।

**विधयः-**

1. आगमन-विधिः।
2. निगमन-विधिः।
3. भण्डारकर-विधिः। इत्यादयः।

**मालविकाग्निमित्रनाटके प्रथमेऽङ्के** (१/१६) शिक्षकस्य लक्षणम् उक्तम् अनेन कविकुलगुरुणा -

(1) **श्लिष्टा क्रिया कस्यचिदात्मसंस्था, सङ्क्रान्तिरन्यस्य विशेषयुक्ता। यस्योभयं साधु स शिक्षकाणाम्, धुरि प्रतिष्ठापयितव्य एव।।**

पद्येऽस्मिन् स्पष्टं भणितं यत् सः एव गुरुः यः स्वयं ज्ञानी वर्तते तथा अधीतज्ञानं अपरेषु सङ्क्रान्तुं समर्थः।

**तैत्तिरीयोपनिषदि** आनन्दवल्ल्यां यथा-

आचार्यः पूर्णरूपम् अन्तेवास्युत्तररूपम्। विद्या सन्धिः। प्रवचनं सन्धानम्। इमानि वाक्यानि गुरुशिष्ययोः महत्त्वं प्रकाशते।

'गुरोः स्थानं प्रथमं ततः परं शिष्यस्य। अनयोः मेलनस्य कार्यं विद्या अर्थात् विषयः करोति। गुरुः शिष्यः विद्या च' एतेषु त्रिषु परस्परं योजयितुं कार्यं करोति अन्तः क्रिया अर्थात् प्रवचनम्।

अतः गुरुकृपया ज्ञानप्राप्तिः सम्भवा।

**नैतिकमूल्यस्योदाहरणं** रघुवंशस्य द्वितीये सर्गे-

यदा महर्षिवशिष्ठस्य धेनोः नन्दिन्याः रक्षार्थं राजा दिलीपः रतः तदा कविकुलगुरुः स्वकीयम् आदर्शशिक्षकं सिंहम् उपस्थापयति। अयं च कविकुलगुरोः शिक्षकः भवितुमर्हति, यः राजानं परीक्षितुं वदति। भो राजन्! अस्याः धेनोः रक्षार्थं भवान् स्वीयं मूल्यवत् वपुः किमर्थं मह्यं ददाति। तदा दिलीपः (कालीदासदृष्ट्या शिष्यः) अभाषत-

(2) **किमप्यहिंस्यस्तव चेन्मतोऽहं, यशः शरीरे भव मे दयालुः। एकान्तविध्वंसिषु मद्विधानां, पिण्डेष्वनास्था खलु भौतिकेषु।।** रघुवंश-द्वितीयसर्गः (2.57)।

भो सिंह ! भवान् मम पिण्डशरीरं भक्षयित्वा स्वक्षुधां शमयतु। एवं मयि दयां कर्तुंम् इच्छति चेत् मे यशः शरीरे करोतु। मम दृष्ट्या तदेव उत्तमम्।

अत्र शिक्षकस्य शिष्यस्य च व्यवहारः लक्षितः अभवत्।

**( 3 ) धैर्यम् -**

जीवने उत्थानं पतनञ्च, सुखं दुःखञ्च आगच्छन्ति गच्छन्ति च। सर्वास्वपि परिस्थितिषु धैर्यं रक्षणीयम्।

कविकुलगुरुकालिदासः पूर्णिमायाः द्वितीये दिवसे प्रातः काले अस्तं गच्छतः चन्द्रस्य उदीयमानस्य च प्रभाकरस्य वर्णनं कुर्वाणः कथयति यत् इदं दृश्यं चलायमानं संसारं शिक्षते यत् समयानुगुणं मनुष्याणां जीवनेऽपि उत्थानं पतनं भवत्येव।

**यात्येकतोऽस्तशिखरं पतिरोषधीनाम्,**
**आविष्कृतोऽरुणपुरस्सरमेकतोऽर्कः।**
**तेजोद्वयस्य युगपद्व्यसनोदयाभ्यां,**
**लोको नियम्यत इवैष दशान्तरेषु।।** (शाकु. 4.2)

(4) अभिज्ञानशाकुन्तले चतुर्थेऽङ्के महाकविकालिदासः उत्तमशिक्षकत्वेन कण्वऋषिणा शकुन्तलाम् उपदेशयति-

**शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने,**
**भर्तुर्विप्रकृतापि रोषणतया मास्म प्रतीपं गमः।**
**भूयिष्ठं भव दक्षिणा परिजने भोगेष्वनुत्सेकिनी,**
**यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः।।**

-अभिज्ञान. (४/१७)

अनेन ज्ञायते यत् पुरुषशिष्य: महिलाशिष्या एतयो: अनयो: मिथ: शिक्षणे भेदो न कृत:। अस्य शिक्षक: पुरुषमहिलयो: पाठने न भिद्यते।

**( 5 ) रघुवंशस्य पञ्चमसर्गे –**

गुरु: दक्षिणां न स्वीकरोति। वारं वारं दातुं कथनेन क्रुद्ध: गुरु: वरतन्तु: स्वकीयं शिष्यं कौत्सं चतुर्दश कोटिमुद्रा आनेतुम् आदिशति।

पश्यतु अत्र गुरो: क्रोधस्य किं बीजम्। अत: विद्याप्रदानं उद्योगो व्यापारो वा न आसीत्, यद् धनं स्वीकृत्य भवेत्।

श्लोको यथा–

**निर्बन्धसंजातरुषार्थकार्श्यमचिन्तयित्वा गुरुणाहमुक्त:।**
**वित्तस्य विद्यापरिसंख्यया मे कोटीश्चतस्रो दश चाहरेति।।**

–रघुवंश ५/२१

(6) विषयस्य उपस्थापनं सरलं स्पष्टं सारगर्भितं स्वाभाविकं भवेत्। यथा रघुवंशे पष्ठे सर्गे (6.67)–

**सञ्चारिणी दीपशिखेव रात्रौ यं यं व्यतीयाय पतिंवरा सा।**
**नरेन्द्रमार्गाट्ट इव प्रपेदे विवर्णभावं स स भूमिपाल:।।**

अत्र कालिदास: विदर्भराजस्य स्वसु: इन्दुमत्या: स्वयंवरं चित्रयति। कालिदास: इन्दुमतीं राजमार्गे अट्टालिकानां समक्षं सञ्चारिणी दीपशिखा अस्ति इति वर्णयति। यथा यत्र दीपो भवति तत्र प्रकाश: तथा यत: प्रकाश: निर्गच्छति तत्र अन्धकार:। अत: सुरम्या: बुद्धिशालिन: जना: अपि प्रसङ्गं ज्ञातुं शक्नुवन्ति।

**( 7 ) विनम्रता रघुवंशे ( 1.2 )**

**क्व सूर्यप्रभवो वंश:, क्व चाल्पविषया मति:।**
**तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्।।**

महाकाव्यलेखनाद् पूर्वं कालिदासेन निवेदितं यत् मत्सदृशेन अल्पज्ञेन अत्यन्तविशालसूर्यवंशस्य वर्णनं लघुनौकया सागरलङ्घनवत् वर्तते।

**( 8 ) गुणज्ञ: –**

कुमारसम्भवे प्रथमे सर्गे (1.3)– ते वदन्ति गुणानां समूहे एक: दोषो निलीयते एवं तै: गुणै: युक्त: स: जन: गुणी एव मन्यते। पद्यं यथा–

**अनन्तरत्नप्रभवस्य यस्य हिमं न सौभाग्यविलोपि जातम्।**
**एको हि दोषो गुणसन्निपाते निमज्जतीन्दो: किरणेष्विवाङ्क:।।**

अनन्तरत्नगर्भे हिमालये एको दोषो 'हिम:' इति अस्ति। तथापि तस्य शोभा किं क्षीणतामुपैति? नैव। अत: गुणसमूहे एक: दोष: तथैव निलीयते यथा चन्द्ररश्मिषु चन्द्रस्य कलङ्क:।

**( 9 ) विदुष: सम्माननम्–**

(1) न धर्मवृद्धेषु वय: समीक्ष्यते। कुमारसम्भवे (५/१६)

(2) न रत्नमन्विष्यति मृग्यते हि तत्। कुमार. (५/४५)

(3) पदं हि सर्वत्र गुणैर्निधीयते। रघुवंशे (८/४६)

**( 10 ) आचार्य: पूज्य: –**

राजा गुरुदक्षिणानिमित्तागतस्य ऋषिवरतन्तो: शिष्यस्य कौत्सस्य विधिवत् पूजनं करोति।

पद्यं यथा–

**तमर्चयित्वा विधिवद्विधिज्ञस्तपोधनं मानधनाग्रयायी।**
**विशां पतिर्विष्टरभाजसारात्कृताञ्जलि: कृत्यविदित्युवाच।।**

– रघुवंशे (५/३)

**( 11 ) वरतन्तो: शिष्याय कौत्साय रघो: आदर-सूचकानि पदानि शृण्वन्तु –**

हे सूक्ष्मबुद्धे ब्रह्मन् ! रविर्यथा अन्धकारान्धं लोकं प्रकाशेन उद्बोधयति तथा अज्ञानतिमिरान्धं त्वां य: ज्ञानप्रकाशेन उद्बोधितवान् स वेदनिधि: ते गुरु: कुशली अस्ति? इति।

**पद्यम्–**

**अप्यग्रणीर्मन्त्रकृतामृषीणां कुशाग्रबुद्धे कुशली गुरुस्ते।**
**यतस्त्वया ज्ञानमशेषमाप्तं लोकेन चैतन्यमिवोष्णरश्मे:।।**

(रघु. ५/४)

**( 12 ) पर्यावरणरक्षक:**

राजा पृच्छति- आश्रमे वृक्षा: सुरक्षिता: सन्ति न वा असुरक्षितम् अस्ति चेद् कृपया वदेत्।

पद्यम् -

**आधारबन्धप्रमुखैः प्रयत्नैः संवर्धितानां सुतनिर्विशेषम्।**
**कश्चिन्न वाय्वादिरुपप्लवो वः श्रमच्छिदामाश्रमपादपानाम्।।**

(रघु. ५/६)

**( 13 ) वन्यजीवानां संरक्षक: -**

राजा कौत्सऋषिं पृच्छति- नवप्रसूता: मृगशावका: स्वस्था: सन्ति किम् ?

अनेन सिद्धयति यत् शिक्षकस्य दायित्वं तेषां वन्यजीवानां सुरक्षा आसीत् तथा ते तेभ्य: स्निह्यन्ति स्म।

**( 14 ) उदात्तभाव: -**

दक्षिणां स्वीकृत्य कौत्स: तं दिलीपं सुपुत्रप्राप्त्यर्थम् आशीर्वादं प्रददाति। तेन गच्छता कालेन राजा सुपुत्रं प्राप्तवान्।

अनेन प्रकारेण वक्तुं शक्यते यत् आचार्यकालिदास: स्वयम् आदर्शशिक्षक: भूत्वा स्वकीयकाव्येष्वपि आदर्शशिक्षकस्य बहून् आदर्शान् दर्शितवान्।

।। शम् ।।

**सन्दर्भग्रन्थसूची :-**


1. शर्मा, उमाशंकर ''संस्कृतसाहित्य का इतिहास'' चौखम्बा भारती प्रकाशन, वाराणसी।
2. झा, उदयशंकर ''संस्कृतशिक्षा'' चौखम्बा सुरभारती प्रकाश, वाराणसी।
3. पाण्डेय, जगन्नाथ, ''संस्कृत साहित्य का इतिहास'', जगदीश संस्कृत प्रकाशन,जयपुर।
4. पाण्डेय रामशकल, ''संस्कृत शिक्षण'', अग्रवाल प्रकाशन, आगरा
5. ''अभिज्ञानशाकुन्तलम्'', चौखम्बा प्रकाशन, वाराणसी।
6. ''रघुवंशमहाकाव्यम्'', चौखम्बा प्रकाशन, वाराणसी।
7. ''कुमारसम्भवमहाकाव्यम्'', चौखम्बा प्रकाशन, वाराणसी।
8. ''मालविकाग्निमित्रम्'', चौखम्बा प्रकाशन, वाराणसी।


**साहित्याचार्य:, शिक्षाचार्य:**

## सूक्ति-सुधा

❑ **डॉ. प्रेमचन्द्र रांवका, पूर्व आचार्य:**

**( 15 वीं.श. आचार्य सकलकीर्ति रचित सुभाषित रत्नावलीत: )**

**यथाणुभि: परं नाल्पं महद् गगनात् न परम्।**
**तथा पञ्चनमस्कारमंत्रात् न मन्त्रो विद्यते।।**

- जैसे परमाणुओं से अधिक छोटा और आकाश से अधिक बड़ा दूसरा कोई नहीं है, वैसे ही पञ्चनमस्कार मंत्र से बड़ा कोई मंत्र नहीं।

**दुःखे सुखे चादिभये कुदेशे व्याधौ गृहे चापि च पर्वतेषु।**
**सुप्ते विषादौ विषमे रणे च पदे पदे त्वं जप मन्त्रराजम्।।**

- दुःख, सुख, समुद्र का भय, कुदेश रोग, चर, पर्वत, शयन्, विषम रण, युद्ध में तुम पदे पदे मन्त्र राज का जप करो।

**य: सप्तव्यसनासक्तो मन्त्रराजं जपेन्नर:।**
**मरणे सोऽपि स्वर्गश्री नाथो भवति नान्यथा।।**

- जो मनुष्य सप्त व्यसनों में आसक्त है, वह भी मरण के समय मन्त्रराज को जपता है तो वह स्वर्ग लक्ष्मी का स्वामी होता है। अन्यथा नहीं।

**जपन्ति ये न मन्त्रेशं दुःखदारिद्र्यनाशनम्।**
**स्वर्गमुक्तिप्रदं तेषां वदनं रन्ध्रवद् वृथा।।**

- जो मनुष्य दुःख और दरिद्रता को नष्ट करने वाले स्वर्ग व मोक्षदायक मन्त्रराज का जप नहीं करते, उनका मुख छिद्र के समान व्यर्थ है।

**यत् संग्रामकरीन्द्रवह्निविषमे सर्पादिरोगव्रजैः,**
**यत् सिंहव्रजतस्करैर्ग्रहभ्रमैर्व्यापत्सरित्सागरैः।**
**भूतप्रेतपिशाचराक्षस-महादुर्बन्धराजादिकैः,**
**यज्जातं भयमत्र मन्त्रजपान्नश्यन्ति हि तं जप।।**

- संग्राम, गजेन्द्र, अग्नि, विषम स्थान, सर्पादि, तथा रोगों में जो भय होता है, सिंह के समूह, चोर, ग्रह, भ्रम, आपत्ति, नदी तथा समुद्र से जो भय होता है भूत, प्रेत, पिशाच, राक्षस तथा दुर्दान्त राजा आदि से जो भय उत्पन्न होता है । वह सब मन्त्रराज को जपने से नष्ट हो जाता है।

**22, श्रीजीनगर, दुर्गापुरा, जयपुर**

पुस्तकसमीक्षा

❑ म.म. देवर्षिकलानाथशास्त्री
प्रधानसम्पादकः

# पद्यपत्रिका पद्यबन्धा

संस्कृतपत्रकारता कियती सक्रिया व्यापकविषया चेति जानीयुरेव संस्कृतसेवकाः। दैनिक-साप्ताहिक-मासिक-त्रैमासिकादिपत्रिकास्तु प्रकाश्यन्त एव संस्कृते, केवलं पद्यविधां प्रसारयन्त्यः पत्रिकाः, कथाविधां प्रसारयन्त्यः पत्रिका अपि प्रकाश्यन्ते इति ज्ञात्वा प्रसीदेयुः पाठकाः। यथा कथाविधायाः पत्रिका ''कथा-सरित्'' प्रकाश्यते प्रयाग-कोलिकाता नगरीयाणां सम्पादकानां साधनया, तथैव पद्यविधाया पत्रिका ''पद्यबन्धा'' अपि प्रायो वर्षदशकात् भोपालतो नियमितरूपेण प्रकाशमायाति यत्र केवलं पद्यबद्धा रचना भारतविश्रुतानां कवीनां प्रकाश्यन्ते। षाण्मासिकी कविता पत्रिकेयं वीणापाणिसंस्कृतपीठात् भोपालस्थात् प्रकाश्यते यस्याः प्रधानसम्पादको डॉ. बनमाली बिश्वालः, सम्पादकश्चास्ति डॉ. धर्मन्द्रकुमारसिंहदेवः।

प्रायो अर्धदशकात् पूर्वं यस्य प्रथमः स्पन्दः प्रारभ्यत यत्र संस्कृत-काव्यरचना, गीतयः, महाकाव्यादीनां क्रमिकप्रकाशनानुयायिनः सर्गाः, विभिन्न-भाषा-काव्येभ्यः संस्कृते काव्यानुवादाः, इत्यादिविषयिणी वैविध्यमयी सामग्री प्रकाश्येतेति नीतिः सूचिता। तदनु प्रत्यङ्कं भारतविख्यातानां कविवर्याणां वैविध्यमय-काव्यरचनाः प्रकाशमायान्त्यस्यां पत्रिकायां नियमित-रूपेण। अद्यावधि पत्रिकाया अस्याः चतुर्दश स्पन्दाः प्रकाशिताः सन्ति येषु काव्यरचनानां वैविध्यं स्पष्टी भवति। समकालीनसंस्कृतकवितापत्रिकायामस्यां 'छन्दोबन्धाः' इत्याख्ये भागे स्तुतयः काव्यरचनाः, गीतिबन्धाः इत्याख्ये भागे गजलप्रभृतिगीतयः, ''मुक्तछन्दोबन्धाः'' इत्याख्ये भागे छन्दोमुक्ताः काव्यरचनाः, हाइकुरचनाः इत्यादयः, 'अनूदितबन्धाः' इत्याख्ये भागे विभिन्नभाषाभ्यः काव्यानुवादाः, 'बालगीतिबन्धाः' इत्याख्ये भागे च बालपाठ्या गीतयः प्रकाशिताः सन्ति। अनेन स्पष्टमनुमातुं शक्यते कविता-पत्रिकाया अस्या बन्धविस्तारः।

एवंविधाः पत्रिका एव संजीवनीकार्यं कुर्वन्ति संस्कृतसाहित्यसमृद्धेः, प्रसारयन्ति च संस्कृतजगति रचनां कुर्वाणानां साहित्यकाराणां लेखनप्रतिभा-प्रकर्षमिति सर्वात्मना स्वागतार्हाण्येवंविधानि प्रकाशनानि। वर्धाप्यन्ते वीणापाणिसंस्कृतसमितेः सर्वेऽपि कार्यकर्तार एतस्याः पत्रिकायाः प्रकाशनाय।

पद्यबन्धा (समकालिक संस्कृतकवितापत्रिका) प्रधानः सम्पादकः बनमाली बिश्वालः, सम्पादकः धर्मेन्द्रकुमारसिंहदेवः प्रकाशिका-वीणापाणि-संस्कृत समितिः, एल. 145 ए बी डी एक पैराडाइज लहरपुर, भोपाल वार्षिकसदस्यता 100/-, मूल्यम् 50/-.

## हाइकु काव्यशतकम्

जापानदेशतः समागता काव्यविधा ''हाइकु'' नाम्नी भारते लोकप्रिया संजाताऽस्तीति सुतरां विस्मयकरं वृत्तम्। सर्वासु भारतीयभाषासु लघुकाव्यविधाया अस्याः सर्जनाऽनेकेभ्यो वर्षेभ्यः प्रचलितास्ति। संस्कृतभाषाऽपि सुतरां जीवन्ती जाग्रती च भाषाऽस्तीत्यस्यामपि हाइकु-विधायां काव्यरचनाऽनेकेभ्यो दशकेभ्यः प्रचलिताऽस्ति। अस्यां हि केवलं सप्तदशाक्षरघटितैका रचना कञ्चिद् विषयं व्यनक्ति। लघुकाव्यस्यायं प्रकारः क्रान्तिकारिणी घटनाऽस्ति। हर्षदेवमाधवप्रभृतयो नूतनकवयः कवय-न्त्यस्यां काव्यविधायामिति दृष्टमेव स्यात् पाठकैः।

सद्य एवास्यां विधायां सुविदितस्याधुनिक-कवे: डॉ. धर्मेन्द्रकुमारसिंहदेवस्य कविताशतकमेकं प्रकाशित- मिति ज्ञात्वा प्रसीदेयु: पाठका:। आधुनिकसमाज-स्थितीनां, राजनीते:, सत्तामदस्य च वर्तमानां स्थितिं वर्णयन्ति हाइकुकाव्यान्यस्मिन् शतके संगृहीतानि सन्ति। हायकुवल्लीयं नवीनकाव्यसरण्या: संस्कृतेऽवतारणां तु प्रमाणयत्येव, अतिसंक्षिप्तशैल्यां स्वाभिप्रायप्रकटन- प्रयोगाश्चापि प्रस्तौति यथा-

**''हंसा बका वा**
**सत्ताबन्धे दृश्यन्ते**
**समानधर्मा:।''**

जानन्त्येव पाठका यदस्यां विधायां प्रथमपंक्तौ केवलं पञ्च, द्वितीयपंक्तौ सप्त, तृतीयपंक्तौ च पञ्च, एवं सप्तदशाक्षराण्येव भवन्ति। तेष्वेकाऽभिव्यक्ति: प्रस्तूयते।

एवंविधानां 101 हाइकुबद्धानां काव्यरचनानामयं संग्रह: ''सत्ताविलास:'' इति शीर्षकं वहन् सद्य एव प्रकाशमाप्तवानित्यस्य स्वागतं विधास्यते नूतनकविता-जगतीति स्पष्टमेव।

**सत्ताविलासः (हाइकुकाव्यम्) कविः डॉ. धर्मेन्द्रकुमारसिंहदेव:, प्रकाशिका, वीणापाणि-संस्कृतसमिति:, एबीडीएम पैराडाइज, लहरपुर भोपाल, पृ.सं. 64 मू. 900/-.**

# गांधीनगरमहिम्नः स्तोत्रम्

**(उपजातिः)**

❑ **प्रो. डॉ. अम्बालालप्रजापतिः**

गांधी महात्मा सदा वंदनीयो तथा पटेल: सरदारसुज्ञः।
तेजोद्वयं भारते भाति राष्ट्रे सदा हरिते नगरे च गान्धेः।। 1।।
जना: सुशीला: कुशलाश्च कार्ये विकासशीलाश्च कलाप्रवीणाः।
विद्यापुरुषाश्च वेदे वरिष्ठाः सदा हरिते नगरे च गान्धेः।। 2।।
तीर्थस्वरूपाश्च शाला: विशाला: पठन्ति शिष्या: खलु ज्ञानलुब्धाः।
विश्वगुरुत्वं हि लक्ष्यं च तेषां सदा हरिते नगरे च गान्धेः।। 3।।
महात्मनो मंदिरं पश्य बन्धो ददाति संदेशमेवात्र शान्तेः
सत्याग्रहो नन्वहिंसानुष्ठानं सदा हरिते नगरे च गान्धेः।। 4।।
विधानसभागृहमेव रम्यं भव्यः सचिवालयश्चातिभव्यः
सेवारतं राजगृहं वरिष्ठं सदा हरिते नगरे च गान्धेः।। 5।।
मार्गाः विशाला: सरला: सुगम्याः मध्ये चतुष्का: सुवारियंत्राः
समानभावेन सहायिनस्ते सदा हरिते नगरे च गान्धेः।। 6।।
वृक्षाः सपुष्पाः विविधाश्च रम्याः संतापहाराश्च च्छायाप्रदानाः।
पुष्पैश्च सुस्वागतं वै जनानां सदा हरिते नगरे च गान्धेः।। 7।।
रामाः रमन्ते विहरन्ति वृद्धाः बालाश्च क्रीडन्ति पतंगमुग्धाः।
गुंजन्ति भृंगाश्च पुंष्पेषु लुब्धाः मनोहरा वै शिशूद्यानशोभा।।8।।
नृत्येन चित्तं च सद्यो मयूराः सुकूजनैश्च श्रुतं कोकिलास्ताः।
हरन्ति चक्षुर् मृगाश्च विचित्राः चेतोहरा वै मृगोद्यानशोभा।।9।।
सारस्वतास्ते मुहुर्वंदनीयाः कुर्वन्ति काव्यं च सुबोधनीयम्।
श्रावं हि श्रावं च नृत्यन्ति सुज्ञाः सदा हरिते नगरे च गान्धेः।।10।।
सेवारताः शासने ये च नित्यं कुर्वन्ति सेवां निरपेक्षभावैः।
स्पर्यार्महार्हाः त्रिलोके पुमांसः सदा हरिते नगरे च गान्धेः।।11।।
अहर्निशं मंदिरे पंचदेवे पूजा च पंचायतनस्य भव्या।
दधाति शुद्धिं च चेतोविकारः सदा हरिते नगरे च गान्धेः।।2।।
स्थापत्यशिल्पेऽपि देशे प्रसिद्धं स्वर्गोपमं चाक्षरधाम दिव्यम्।
संस्कारधर्मेऽपि च ललामभूतं सदा हरिते नगरे च गान्धेः।।13।।
देवो यथैको प्रतिमन्दिरे वै तथैव चात्मा शरीरे शरीरे।
कुर्वन्ति बोधं तत्वप्रलीनाः सदा हरिते नगरे च गान्धेः।।14।।
स्तोत्रं महिम्नो नगरस्य गान्धेः पठेन्नरो यः सदा शुद्धबुद्धिः।
भक्तिश्च महात्मनो विश्वमूर्तेः भव्या च भवेदचला च लोके।।15।।

25, गुजरात हाउसिंग बोर्ड
गांधीनगर-382021

# अस्माकं गुरवः

( गताङ्कादग्रे )

❑ वेणीमाधव गो. धर्माधिकारी

### स्वतन्त्रे भारते संघस्यावश्यकता

देशविभाजने जाते पाकस्थाने च स्वतन्त्रदेशे संजाते हिन्दुमुस्लिमजनानां संघर्षस्य उपद्रवाणां च मूलं कारणमेव नावशिष्टमथापि संगठनकार्यस्य कावश्यकतास्तीति 1942 ई. वर्षानन्तरं महती चर्चा प्रचलितासीत्। एतादृशानां प्रश्नानामुत्तरे गुरुमहाभागैः स्पष्टीकृतं केनापि संघर्षं कर्त्तुं, संघर्षप्रतीकारार्थमेव वा संघनिर्माणं नास्ति। राष्ट्रीयचारित्र्यनिर्माणं संघस्य प्रमुखं कार्यमस्ति। यदि देवदूतस्य (पेगम्बर) महामदस्य जन्म एव नाभविष्यत् अद्यत्वे च यथा असंगठितो हिन्दुसमाजो अभविष्यत्तदापि संगठन-कार्यमावश्यकमेव।

### सर्वसुलभा स्वदेशी पद्धतिः

कस्मिन्नपि देशे स्वतन्त्रताप्राप्त्यनन्तरं तत्रत्यने-तृभिः मुख्यतया करणीयमेकं कार्यमनिवार्यमस्ति। तद्धि तत्रत्यजनतायाः मनःस्थितौ परिवर्तनम्। नवोदितस्य स्वतन्त्रभारतस्य मनःस्थितिं गुरवः सम्यग् जानन्तिस्म। ब्रिटिशसत्ताधारिभिर्जनैः भारते केवलं राजनैतिकरूपेणार्थिकरूपेणैव वा न सर्वदृष्ट्या सर्वथा च मानसं दासीकर्त्तुं प्रयतितमासीत्। अस्मिंश्च ते किञ्चिन् मात्रायां सफला अप्यासन्। अस्माकं स्वातन्त्र्यसंघर्षस्य नायकैरपि संकटमेतद् ज्ञातमासीत्। स्वदेश्यान्दोलनम्, गोरक्षान्दोलनम्, स्वभाषाप्रयोगा-ग्रहः इत्यादि कार्यक्रमैस्तैः तीव्रः प्रचारः कृतः।

पूज्यद्राक्तरमहोदयानन्तरं श्रीमद्भिः गुरुमहा-भागैरपि एतदुद्देश्येन संघमाध्यमेन जनमानसं प्रबोधयितुं प्रयत्नः कृतः। स्वदेशीयपदार्थं प्रति तेषां विचारः केवलं स्ववस्तूनामुपयोगस्यैवाग्रहो न पर्याप्तः अपितु स्वनित्य-जीवने सर्वेष्वेव कार्यक्रमेषु यथा-विवाह निमन्त्रणेषु कार्यक्रमपत्रिकादिषु, अभिनन्दनसन्देशादिष्वपि स्वभाषाप्रयोगार्थमाग्रहः स्यात्, गृहे जन्मदिवसाद्युत्सवाः भारतीयपद्धत्या भवेयुः। एतादृशेषु सर्वेषु कार्येषु भारतीयतायाः आग्रहस्तैः कृतः।

द्राक्तरमहोदयानां समये एव संघेन हिन्दीभाषैव प्रचारप्रसारसाधनरूपेण स्वीकृतासीत्। सहैव सर्वासां भाषाणां (विश्वभाषाणामपि) जननीं संस्कृतभाषामपि मुख्यता प्रदत्ता। अनया दृष्ट्या संघस्यादेशवाक्यानि, प्रार्थना, एकात्मतास्तोत्रम्, एकात्मतामंत्राः, भोजन-मन्त्रादीनि संस्कृते निर्मितानि सन्ति। शनैः शनैः घोषेऽपि तावत्प्रचलितानामांग्लभाषाणां रागादीनां स्थाने भारतीयानां रागाणां प्रचलनमारब्धम्। तदर्थं च पोषिकाः संस्कृते नूतनाः घोषरचना निर्मिताः। संघस्वयंसेवकैः संचालितेषु विद्यालयेषु तत्रस्थ-मातृभाषैव माध्यमरूपेण स्वीकृतास्ति। अद्यत्वे विद्याभारतीसंस्थासम्बद्धाः (24000) चतुर्विंशति-सहस्रतोऽधिकाः शिशुकक्षातो द्वादश-कक्षान्ताः, अन्ये च स्नातकोत्तरकक्षापर्यन्ताः विद्यालयाः कार्यरताः सन्ति।

### श्रद्धाबिन्दुरूपे गोरक्षणार्थं प्रयत्नः

भारते प्राचीनकालादेव गोवंशः श्रद्धाबिन्दुरूपेण

पूज्यो वन्दनीयो स्वीकृतोऽस्ति। यज्ञेषु गावः दक्षिणा-रूपेण दीयन्ते स्म। दिलीपस्य राज्ञो गोसेवया रघोर्जन्म प्रसिद्धमेव। स्वातन्त्र्यसंघर्षे सर्वैरेव नेतृभिर्गोरक्षापि हेतुत्वेन स्वीकृतासीत्। श्रीगुरुमहाभागैरपि विषयमेतदुत्थाप्य मंचः समुपस्थापितः। गोहत्या-निषेधसमितिरिति तन्नाम आसीत्। तस्मिन् प्रख्याता गोभक्ताः साधवः सन्तश्च सम्मिलिता बभूवुः। संविधाने तन्नियमनिर्माणार्थं समर्थने स्वयंसेवकैः सम्पूर्णे देशे 1.75 कोटिवयस्कजनानां हस्ताक्षराणि संगृहीतानि तान्येतानि हस्ताक्षराणि 81594 नगरेभ्यो ग्रामेभ्यश्च संगृहीतान्यासन्। तानि सर्वाण्यादाय देहल्यां 7.12.1952 दिने तत्कालीनेभ्यो राष्ट्रपतिभ्यो द्वाविंशतिगोरथैः समर्पितानि। तस्मिन् शिष्टमण्डले प्रमुखाः गुरव एवासन्। केन्द्रसर्वकारस्तु तस्मिन् समये अखिलभारतीयसंविधाने नियमनिर्माणमनः स्थितौ नासीत् परं कतिपयराज्येषु गोहत्यानिषेध-नियमः प्रवर्त्तितः।

**भाषानुसारिप्रान्तरचना संकटाह्वानम्**

तेष्वेव दिवसेषु भारतस्य भाषानुसारिप्रान्तरचना-विषये तीव्रा चर्चा प्रचलितासीत्। श्रीगुरुमहाभागै-रेतादृश्यां रचनायां स्थितानां संकटानामुल्लेखं कुर्वद्भिः कथितमासीत्-अनया अग्रे गत्वा भाषामधिकृत्य दुरभिमानः संभवितुं शक्नोति। एतदेवाश्रित्य पार्श्ववर्तिषु राज्येषु विवादः संभवितुं शक्नोति, रक्तपातोऽपि भविष्यति। अस्मिन् विषये प्रभावपूर्णं लेखं विलिख्य देशस्य कर्णधारकानां नायकानामा-ह्वानं कृतं यत्स्वमनसि साहसमेकीकृत्य एकात्म-शासनमङ्गीकुर्युः। अमेरिकादेशमखण्डमुपस्थापयि-तुमब्राहिमलिङ्कनेन या ऐतिहासिकी भूमिकाङ्गीकृता तत्स्मरणमपि कारितमासीत्। परं दौर्भाग्येन राष्ट्र-स्याखण्डत्वनिर्माणार्थं तत्कर्त्तुमावश्यकं मनोबलं शासकेषु नासीत्। तेनैव कावेरीजलविवादः, नर्मदा जलविवादः हरियाणापंचनदसीमाविवादाश्चोत्पन्नाः।

क्रमशः -

**ब्रह्मपुरी, जयपुरम्**

---

**प्रेरकप्रसङ्गशतकम्** **त्र्यशीतितमः प्रसङ्गः**

# विचित्रा वरयात्रा

**❑ सौ. आराधना धर्माधिकारी**

ह्यः सायं कार्यालयाद् गृहागमनसमये एका विचित्रा वरयात्रावलोकिता। एकस्यां द्विचक्रिकायां चलदूरभाषयन्त्रेण संयोजितं ध्वनिसंचारकयन्त्रम् आसीत्। यस्मिन् हिन्दीभाषायां छायाचित्राणां गीतानि आगच्छन्ति स्म। तेन सहैव नवोढावरौ चास्ताम्। पृष्ठतः पंच परिवारजना आसन्। तेषामिमां दीनावस्थां विलोक्य पूर्वं तु खेदः संजातः परं पश्चादवहितं वस्तुतस्तु श्रेष्ठतमं जीवनं त्वेत एव यापयन्ति, ऋणं विनैव वैवाहिकपरम्परायाः आनन्दमनुभवन्ति। यत्सविधेऽस्ति तेनैवानन्दानुभवं चोपदिशन्ति।

**''तावत्पादौ प्रसार्येतां यावदावरणं भवेत्**
**तेते पाँव पसारिये जेती लांबी सोर।''**

**218, धर्माधिकारिभवनं, ब्रह्मपुरी, जयपुरम्**

नारी-स्तम्भः

# उद्धरेदात्मनाऽऽत्मानम्

❑ डॉ. राजेश्वरी भट्ट

''यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः'' इति संस्कृतिसंरक्षकेऽस्मिन् देशे सुरसाया मुखमिव सततं वर्द्धमानं नार्युत्पीड़नं न केवलं शोचनीयं, गर्हणीयम्, अपितु धिक्करणीयं भयप्रदञ्च जातम्। अद्य नारीसुरक्षा राष्ट्रस्य सम्मुखे विकराला समस्याऽभवत्। ग्रामेषु, वीथिषु, नगरेषु, वाहनेषु, चिकित्सालयेषु-मेलकेषूत्सवेषु किमधिकं गृहेषु शिक्षाकेन्द्रेषु धर्मगुरूणामाश्रमेषु देवालयसदृश-पावनमन्दिरेष्वपि नारी असुरक्षितामात्मानं मन्यते। वयः, पारिवारिक, सामाजिकसम्बन्धानुपेक्ष्य रक्षकाः राक्षसा जाताः।'मातृवत् परदारेषु' सम्मानेनानेन सम्मानिता नारी अद्य कन्या, युवती, वृद्धा इति त्रिषु रूपेषु अरक्षिता दृश्यते। प्रातः कर्मक्षेत्रं प्रति गृहान्निर्गता अवकाशं प्राप्य सकुशलं गृहमागच्छेदिदमपि संशयात्मकमभवत्। कदा तु धनलुब्धकैर्वञ्चकैः मार्गे गच्छन्तीनां नारीणां शरीरेभ्य आभूषणानि लुण्ठ्यन्ते, कुत्रचिन्नारीणां हस्ताद् धनस्यूता अपह्रियन्ते। अन्यत्र प्रेमसम्बन्धे असफला निराशकामिनः युवत्याः शरीरे अम्लद्रवं प्रक्षिप्य युवतीनां रूपं विकारयन्ति जीवनञ्च दुर्वहं कुर्वन्ति। नित्यं नारीणां यौवनशोषणस्य बलात्कारस्य, ततो दहनस्य प्राणहरणस्य दुर्दान्ताभिर्घटनाभी राष्ट्रं विकम्पितं वर्तते। सप्तवर्षाणि पूर्वं राष्ट्रस्य राजधान्यां दिल्लीनगर्यां जातेन निर्भया-बलात्कारकाण्डेन प्रज्वलिता क्रोधाग्नि अद्यापि जनमानसे स्फुल्लिङ्गायते। नूनं निर्भयाकाण्डस्य आरोपिणः मृत्युमुखे गामिष्यन्ति तदा अग्निरयं कदाचित् शाम्येत्। एतावताऽपि नार्युत्पीडनस्य क्रमोऽयं अविरतगत्या प्रवर्तितो दृश्यते। सम्प्रति हैदराबादनगरे जाते बलात्कारकाण्डे आरक्षीदलस्य दुष्कर्मिणाञ्च मध्ये जाते संघर्षे बलात्कारकाण्डस्य चतुर्णाम् आरोपिणां निधनं जातम्। तथापि स्थगित कर्णविवरौ दुष्कर्मिणः कुमार्गमेवाश्रयन्ति। उत्तरप्रदेशे, टोंकनगरे, छत्तीसगढ़प्रदेशे अमृतसरे च सततं बलात्कारस्य घटना राष्ट्रस्य गौरवं हन्ति। राष्ट्रिय-अपराध ब्यूरो इति संस्थाया माध्यमेन प्रसारितैः समाचारैः ज्ञायते यत् राष्ट्रे प्रतिदिनं प्रायः पञ्चाशत् ( 50 ) महिला-बलात्कारेण नार्यः अपराधिनां कृते उचितदण्डविधानाय उच्चस्वरेण क्रोशन्ति, किन्तु न्यायव्यवस्थायाः शैथिल्येन अपराधिनः शिरांसि उत्थाय समाजे स्थिता दृश्यन्ते। अस्मिन् विषये नार्यः स्वयमपि सावहिता भवेयुः। नारीभि आत्मनो मौलिकानधिकारान्प्रति जागरूकाभिर्भवितव्यम्। नगरे सुलभानामनिवार्यसेवास्थलानां सम्पर्क-सूत्राणि नारीभिर्ज्ञातव्यानि। 'महिलाआयोग' इति संस्थया सह ताभिः सम्पर्कः साधयितव्यः। असामाजिकतत्त्वानां कुचेष्टाभिः आत्मानं रक्षितुं नगरेषु महानगरे च जुडो-कराटे, मार्शल-आर्ट, मुष्टिप्रहार, मल्लक्रीडादीनि संस्थानानि कार्यरतानि सन्ति, यत्र नारीणां कृते आत्मरक्षायै उचितं प्रशिक्षणं सुलभं वर्तते। अत्र प्रशिक्षिताः नार्यः नूनं आत्मनाऽऽत्मानं रक्षितुं समर्थाः भवेयुः।

## हिन्दी अनुवाद

''जहाँ नारी की पूजा की जाती है वहाँ देवता निवास करते हैं'' इस संस्कृति का संरक्षण करने वाले देश में सुरसा के मुँह की भाँति निरन्तर बढता हुआ नारी उत्पीडन न केवल शोचनीय, निन्दनीय ही है अपितु धिक्करणीय एवं भयावह है। आज नारी-सुरक्षा राष्ट्र के सम्मुख विकराल समस्या बन गई है। गाँव, गली, नगर, वाहन, चिकित्सालय, मेले इत्यादि स्थानों में अधिक क्या कहे, घर, शिक्षाकेन्द्र, धर्मगुरुओं के आश्रम तथा देवालय के समान पवित्र मन्दिरों में भी नारी अपने को असुरक्षित समझती है। आयु, पारिवारिक तथा सामाजिक सम्बन्धों को ताक पर रखकर रक्षक ही अब राक्षस बन गए हैं। 'मातृवत् परदारेषु' अर्थात् 'पराईस्त्री को माता के समान समझो' इस सम्मान से सम्मानित नारी आज कन्या, युवती तथा वृद्धा इन तीनों ही रूपों में अरक्षिता है। प्रात:काल अपने कार्य स्थल पर जाकर नारी अवकाश के पश्चात् अपने घर सकुशल आजाए यह भी आजकल सन्देहास्पद है। कहीं पर धन के लिए भी धूर्तो के द्वारा नारी के शरीर से आभूषण लूट लिए जाते हैं, कहीं नारियों के हाथों से पर्स छीन लिए जाते हैं। कभी कभी प्रेमसम्बन्ध में असफल युवक युवतियों के शरीर पर तेजाब फेंककर उनका रूप नष्ट कर देते हैं, तथा जीवन व्यर्थ कर देते हैं। प्रतिदिन नारियों के शोषण बलात्कार, दहन एवं प्राणहरण जैसी दुर्दान्त घटनाओं से शब्द विकम्पित हैं। सात वर्ष पूर्व राष्ट्र की राजधानी दिल्ली में घटित निर्भया बलात्कार काण्ड के प्रतिशोध में प्रज्वलित क्रोधाग्नि आज भी जनमानस में दहक रही हैं निश्चय ही निर्भया काण्ड के आरोपियों की मृत्यु के पश्चात् ही यह अग्नि शान्त होगी। हाल ही में हैदराबाद नगर में घटित बलात्कार काण्ड में पुलिस एवं बलात्कार के चार आरोपियों के बीच होने वाले संघर्ष में चारों आरोपियों की मृत्यु हो गई। तत्पश्चात् भी दुष्कर्मी कुमार्ग पर ही डटे हुए हैं। कुछ दिन पूर्व उत्तर प्रदेश, छत्तीसगढ़, टोंक तथा अमृतसर में घटित बलात्कार की घटनाओं से राष्ट्र की छवि धूमिल हुई। 'राष्ट्रिय अपराध ब्यूरो' नामक संस्था के माध्यम से प्रचारित प्रसारित समाचारों से ज्ञात होता है कि राष्ट्र में प्रतिदिन 'पचास' महिला बलात्कार की शिकार होकर अपराधियों के लिए उचित दण्डव्यवस्था के लिए उच्च स्वर में चीखती चिल्लाती हैं किन्तु न्याय-व्यवस्था में शिथिलता होने से अपराधी सिर उठाकर समाज में घूमते रहते हैं। इस विषय में नारी को स्वयं भी आत्म सुरक्षा के विषय में सचेत रहना चाहिए। अपने मौलिक अधिकारों के प्रति नारियों को जागरूक रहना चाहिए। नगर में सुलभ अनिवार्य सेवा स्थलों के सम्पर्क सूत्रों से परिचित होना भी नारियों के लिए लाभप्रद है। 'महिला आयोग' जैसी संस्थाओं से सम्पर्क में रहना चाहिए। नगरों एव महानगरों में असामाजिक तत्वों की ज्यादती अपने को बचाने के लिए जूड़ो, कराटे, मार्शल आर्ट, मुष्टिप्रहार तथा मल्लक्रीडा आदि संस्थाएं हैं जहाँ नारियों के लिए आत्म रक्षा का उचित प्रशिक्षण सुलभ है। ऐसी संस्थाओं में प्रशिक्षित नारियाँ निश्चय ही अपनी रक्षा करने में समर्थ होंगी।

**-सी-276, भाभा मार्ग, तिलकनगर, जयपुर**

आयुर्वेद-स्तम्भः

# पिप्पली स्वादुपाका रसायनी

❑ प्रो. बनवारीलालगौडः
पूर्व-कुलपतिः

**''स चैव भिषजां श्रेष्ठो रोगेभ्यो यः प्रमोचयेद्'' इत्यनेन वैद्यस्य रोगहारकत्वमुच्यतेः सम्यग्युक्तस्य भेषजस्य सर्वदा श्रेष्ठा एव परिणामाः भवन्ति। ज्ञानपूर्वं भेषजप्रयोगेण कदापि हानिर्न भवति। आयुर्वेदीये स्वास्थ्यसंरक्षणक्रमे देशं कालञ्चापेक्ष्यैव हेमन्ते शिशिरे च बहुविधानां बलवर्धकानां स्वास्थ्यसंरक्षकाणां व्याधिक्षमताभिवृद्धिकराणां रसायनस्वरूपाणां वाजीकरणात्मकानां च योगानां प्रयोगः परम्परया प्राचीनकालत एव प्रचलितो वर्तते।**

वैद्यों में वही श्रेष्ठ है जो रोगों से मुक्ति दिलाता है, इससे ही वैद्य का रोगहारकत्व कहा जाता है, क्योंकि सम्यक् प्रकार से प्रयुक्त भेषज के परिणाम सर्वदा श्रेष्ठ ही होते हैं। ज्ञानपूर्वक किए गए भेषज के प्रयोग से कभी भी हानि नहीं होती है। आयुर्वेदीय स्वास्थ्यसंरक्षणक्रम में देश और काल की अपेक्षा करके ही हेमंत में तथा शिशिर में अनेक प्रकार के बलवर्धक स्वास्थ्य का संरक्षण करने वाले तथा व्याधि की क्षमता को बढ़ाने वाले एवं रसायनस्वरूप वाले तथा वाजीकरण करने वाले योगों का प्रयोग परम्परा से प्राचीन काल से ही प्रचलित है।

**ये हि जना आयुर्वेदीयाः न सन्ति तेऽप्येतादृग्विधानां रसायनस्वरूपात्मकानां वाजीकरणात्मकानां च दिव्यानां मोदकस्वरूपाणां पाकस्वरूपाणाञ्च योगानां प्रयोगङ्कुर्वंति। भारतवर्षे विशेषेण तूत्तरभारते शीतकाले मेथीमोदकानां शुण्ठीमोदकानामजमोदिकाभिर्विनिर्मितानां मोदकानां हरिद्रामोदकानामन्येषाञ्च सुनिर्मितानाम्मोदकानाम्प्रयोगो भवति। एतेषां मोदकानां निर्माणविधिस्तु ते जानन्ति सम्यक् प्रकारेण, पुनरपि मया समये-समये बहवः लेखाः लिखिताः प्रकाशिताश्चास्यां संस्कृतभारतीपत्रिकायाम्, ते तत्र दृष्टव्याः।**

जो जोग आयुर्वेदीय नहीं है वे भी इस प्रकार के रसायनस्वरूप वाले एवं वाजीकरण करने वाले दिव्य मोदकस्वरूप वाले तथा पाकस्वरूप वाले योगों का प्रयोग करते हैं। भारतवर्ष में विशेषकर तो उत्तर भारत में शीतकाल में मेथीमोदक, शुण्ठीमोदक तथा अजवाइन से बने हुए लड्डुओं का एवं हल्दी से बने हुए लड्डुओं का और अन्य भी अच्छी प्रकार से बनाए हुए मोदकों का प्रयोग होता है। इनकी निर्माणविधि तो वे सम्यक् प्रकार से जानते ही हैं, फिर भी मेरे द्वारा समय-समय पर अनेक लेख लिखे गए हैं और इस संस्कृत भारती पत्रिका में प्रकाशित हुए हैं, वे वहीं देखे जाने चाहिए।

### पिप्पली स्वादुपाका रसायनी

**वर्तमानकाले वातावरणेऽत्यधिकं प्रदूषणं वर्तते, सुखासनशय्यादीनां सेवनं कुर्वाणाः जना ''एसी-संयुक्तेषु'' शीतनिवारकेषु भवनेषु निवसन्ति, पदयात्रामपि न कुर्वन्ति, प्रातःकाले ब्राह्मे मुहूर्ते नैवोत्तिष्ठन्ति, सूर्योदयानन्तरमेव जागरितास्ते शीतेषु सर्वथा संवृताः सर्वाणि कार्याणि कुर्वंति। अस्मात् कारणादेव तेषु व्याधिक्षमतायाः पूर्णरूपेणाभावो भवति। अत एव शीतेषु कास-क्षय-शोष-हिक्कादिभिः रोगैः सहजतयाक्रान्ताः कदाचिद् गलामयैः पीड़ितास्ते जनाः परमदुःखिताः बहुशः श्लेष्मष्ठीवनङ्कुर्वन्ति पुनः पुनः सिङ्घाणकमपि प्रक्षिपन्तीतस्ततः। रात्रावपि सुखनिद्रां नैवानुभवन्ति।**

वर्तमान काल में वातावरण में अत्यधिक प्रदूषण है। सुखपूर्वक आसन पर बैठे रहने एवं शय्या इत्यादि का सेवन करने वाले लोग ''ए सी'' लगे हुए शीत को दूर करने वाले भवनों में निवास करते हैं, पदयात्रा भी नहीं करते हैं, प्रात:काल में ब्राह्म मुहूर्त में नहीं उठते हैं, सूर्योदय के बाद ही जागे हुए, शीतकाल में सर्वथा चारों तरफ से ढककर और पहनकर सभी कार्यों को करते हैं। इस कारण से ही उनमें व्याधिक्षमता का पूर्ण रूप से अभाव होता है। इसलिए वे लोग शीत ऋतु में कास-क्षय-शोष-हिक्का इत्यादि रोगों से सहजतापूर्वक आक्रान्त होते हैं। कभी गले के रोगों से पीड़ित हुए अत्यधिक दु:खित होते हैं तथा बार-बार श्लेष्मा का ष्ठीवन करते हैं अर्थात् कफ को थूकते हैं, बार-बार नासिका से निकलने वाले सिङ्घाणक को भी इधर उधर फेंकते रहते हैं, रात्रि में भी सुखनिद्रा का अनुभव नहीं करते हैं।

**पिप्पली दीपनी वृष्या स्वादुपाका रसायनी च भवति, जनाः विचारयन्ति यत्पिप्पली ''उष्णा'' भवति, किन्तु नैतत्सत्यं, पिप्पली त्वनुष्णा भवत्यर्थात् नैषा ''उष्णा'' न च ''शीता'' भवति, यद्यपि रसे कटुका ह्येषा स्निग्धा वातश्लेष्महरी तथा लघुः भवति।**

**कदाचित् विभिन्नैः कारणैः कतिपय जनास्तु ग्रहणीदोषं पाण्डुतां विषमज्वरमर्शांसि वैस्वर्यं पीनसं शोफं गुल्मं वातबलासकञ्च पृथक् पृथक् रूपेण प्राप्नुवन्ति, तेषाङ्कृते तु पिप्पलीरसायनस्य प्रयोगाः सर्वोत्कृष्टाः भवन्ति।**

पिप्पली दीपनी वृष्या स्वादुपाक वाली एवं रसायनी होती है, लोग विचार करते हैं कि पिप्पली ''उष्णा'' होती है, किन्तु यह सत्य नहीं है, पिप्पली तो अनुष्णा होती है अर्थात् यह न तो ''उष्णा'' और न ''शीता'' होती है, यद्यपि रस में कटुका यह स्निग्धा और वातश्लेष्महरी तथा लघु होती है।

कभी-कभी कुछ लोग तो अनेक कारणों से ग्रहणीदोष, पाण्डुता, विषमज्वर, अर्शोरोग, वैस्वर्य, पीनस, शोफ, गुल्म एवं वातबलासक ज्वर को पृथक् पृथक् रूप से प्राप्त करते हैं, उनके लिये तो पिप्पलीरसायन के प्रयोग सर्वोत्कृष्ट होते हैं।

**आचार्यश्चरको निर्दिशति यत्-**

**पिप्पल्यो हि कटुकाः सत्यो मधुरविपाका गुर्व्यो नात्यर्थं स्निग्धोष्णाः प्रक्लेदिन्यो भेषजाभिमताश्च ताः सद्यः शुभाशुभकारिण्यो भवन्ति, आपातभद्राः, प्रयोगसमसाद्गुण्यात्, दोषसञ्चयानुबन्धाः, सततमुपयुज्यमानाः हि गुरुप्रक्लेदित्वाच्छलेष्माण-मुत्क्लेशयन्ति, औष्ण्यात् पित्तं, न च वातप्रशमना-योपकल्पन्तेऽल्पस्नेहोष्णभावात्, योगवाहिन्यस्तु खलु भवन्ति, तस्मात् पिप्पलीर्नात्युपयुञ्जीत। चरक. विमान 1/16**

आचार्य चरक निर्देश करते हैं कि पिप्पलियाँ कटु रस वाली होती हुई भी मधुर विपाक वाली होती हैं, भारी होती हैं, लेकिन अत्यधिक उष्ण एवं स्निग्ध स्वरूप वाली यह शरीर के अंदर प्रक्लेद अर्थात् गीलापन या चिपचिपाहट उत्पन्न करने वाली होती हैं। भेषज के रूप में प्रयुक्त हुई ये तत्काल ही शुभ या अशुभ करने वाली होती हैं। वे सब ओर से शुभकारी होती हैं (आपातभद्राः), योग में व्यवस्थित रूप से प्रयुक्त ही गई ये लाभदायक ही होती हैं, लेकिन अनुचित रूप से प्रयुक्त किये जाने पर वे दोषों का सञ्चय करने में अनुबंध स्वरूप वाली होती हैं। यदि इनका निरंतर प्रयोग किया जाए तो ये भारी और क्लेदयुक्त (शरीर में क्लेद उत्पन्न करने वाली) होने के कारण श्लेष्मा का उत्क्लेश करती हैं उष्ण होने के कारण पित्त को उत्पन्न करती हैं और अल्प स्नेह और उष्णस्वरूप वाली होने के कारण वात का शमन नहीं

करती हैं, योगवाहिनी होती हैं, इसलिए पिप्पली का अत्यधिक (अधिक मात्रा में एवं अधिक समय तक) उपयोग नहीं करना चाहिए।

**ताः सद्यः शुभाशुभकारिण्यो भवन्त्यत एवैतासामत्युपयोगो न करणीयः। योगवाहित्वेन कटुकानामपि पिप्पलीनां वृष्ययोगेषुप्रयोगः तथा ज्वरगुल्मकुष्ठहरादियोगेषु प्रयुक्ता ज्वरादीन् हन्ति पिप्पली। अयं च पिप्पल्यतियोगनिषेधोऽपवादं परित्यज्य ज्ञेयः। तेन, पिप्लीरसायनप्रयोगस्तथा गुल्मादिषु च पिप्पलीवर्धमानकप्रयोगो न विरोधमावहति। अत एव रसायनस्वरूपे त्वधिक-कालपर्यंतस्तथाधिकमात्रया प्रयोगः समुचितो भवति। अत्र पिप्पलीमधिकृत्य केषाञ्चिद्रसायन-प्रयोगाणामुल्लेखः क्रियते-**

यहाँ यह स्पष्ट जान लेना चाहिए कि ये शीघ्र ही (तत्काल ही) शुभ और अशुभ  करने वाली होती हैं, अतः इनका अत्यधिक उपयोग नहीं करना चाहिए। योगवाही होने के कारण (योगवाही का तात्पर्य है कि इसको जिस द्रव्य के साथ प्रयुक्त किया जाए यह उसके अनुरूप ही अपने गुणों को प्रदर्शित करती है, यद्यपि अपने मूल गुणों का पूर्ण रूप से त्याग नहीं करती है, इसलिए योगवाही होने के कारण) कटुरसवाली होते हुए भी इन पिप्पलियों का प्रयोग रसायन में किया जाता है तथा योगवाही होने के कारण ही यह ज्वर, गुल्म एवं कुष्ठ को दूर करने वाले योगों में प्रयुक्त की कई ज्वर आदि को नष्ट करती है, पिप्पली का अति मात्रा में प्रयोग निषिद्ध होने पर भी अपवाद को छोड़ कर के यह ज्वर आदि को नष्ट करने वाला स्वरूप जानना चाहिए। इसीलिए पिप्पली का रसायन रूप से प्रयोग होता है तथा गुल्म इत्यादि रोगों में पिप्पलीवर्धमान प्रयोग का (जिसमें कि अत्यधिक मात्रा में अत्यधिक समय तक पिप्पली का प्रयोग होता है उसका) विरोध नहीं होता है, अर्थात् रसायन आदि में पिप्पली का अधिक मात्रा में भी प्रयोग किया जाना उचित होता है, यहाँ पिप्पली को ध्यान में रखकर कुछ रसायन-प्रयोगों का उल्लेख किया जा रहा है-

**1. रसायनगुणैषिणा स्वस्थेन रुग्णेन वा जनेन किंशुकक्षारभाविताः (दक्षैश्चिकित्सकैः परिभा-विताः सुसिद्धाश्च) घृतभर्जिताः मधुसम्मिश्राः पञ्च सप्त वा पिप्पल्यः चिकित्सकनिर्देशेन प्रयोज्याः, प्रयोगस्त्वेषः दीपावल्यनन्तरं प्रारभ्य होलिकापर्यन्तः करणीयः, अस्याः सेवनकाले पयसः प्रयोगो विशेषेण करणीयः।**

रसायन गुण की इच्छा करने वाले स्वस्थ या रुग्ण व्यक्ति के द्वारा किंशुकक्षार से भावित दक्ष चिकित्सकों के द्वारा परिभावित एवं अच्छी प्रकार से सिद्ध की गई घृत में भुनी हुई मधु से मिली हुई 5 या 7 पिप्पलियों का प्रयोग चिकित्सक के निर्देश से किया जाना चाहिए। यह प्रयोग दीपावली के बाद प्रारंभ करके होली तक करना चाहिए, इसके सेवन काल में दूध का प्रयोग विशेष रूप से करना चाहिए।

**2. यदि चेत् किंशुकक्षारभाविताः पिप्पल्यः सुलभाः न भवन्ति तदा त्वभाविता एव पञ्च सप्त वा पिप्पल्यः दुग्धे समुत्क्वाथ्य प्रयोज्याः। एषः प्रयोगः रात्रावेव करणीयः। दशदिवसात्मके प्रयोगे तु सामान्यतया चिकित्सकीयस्य परामर्शस्यावश्यकता न वर्तते, किन्त्वधिकदिवसात्मके प्रयोगे तु चिकित्सकस्य निर्देशः परमावश्यकः।**

यदि किंशुकक्षार से प्रभावित पिप्पलियाँ सुलभ नहीं होती हैं तो विना भावना दी हुई ही 5 या 7 पिप्पलियाँ दूध में उबालकर प्रयुक्त की जानी चाहिए। यह प्रयोग रात्रि में ही करना चाहिए। 10 दिवस के प्रयोग में तो सामान्यतया चिकित्सकीय परामर्श की आवश्यकता नहीं होती है, किन्तु अधिक दिवस वाले प्रयोग में तो चिकित्सक का निर्देश परम आवश्यक होता है।

**3. अथवा घृतभर्जितानां तिसृणां पिप्पलीनाञ्चूर्णङ्कृत्वा मधुमिश्रितानां पूर्वाह्णे भोजनात् प्राक् लेहनं करणीयम्। ये हि श्वासेन कासेन च विशेषेण पीड़िताः सन्ति तैरेतासां प्रयोगः समुचितो वर्तते, येषाञ्च कंठे घुर्घुरुकं तथाश्लेष्मष्ठीवनं विशेषेण भवति तेष्वेतासां प्रयोगः पूर्वाह्णे भुक्त्वा भोजनात्पूर्वञ्च करणीयः, सायङ्काले त्वस्य प्रयोगस्यावश्यकता न वर्तते। यदि चिकित्सकः समुचिततां पश्यति तदा तु सायङ्कालेऽपि करणीयस्तस्यैव च परामर्शेन प्रयोगोऽयं मासत्रयपर्यन्तः करणीयः।**

अथवा घी में भुनी हुई तीन पिप्पली का चूर्ण करके शहद में मिलाकर पूर्वाह्ण में भोजन के पहले चाटना चाहिए, जो श्वास और काम में विशेष रूप से पीड़ित हैं उनके लिए यह प्रयोग उपयुक्त रहता है, जिनके कंठ में घुर्-घुर् की आवाज होती है तथा बार-बार विशेष रूप से कफ को थूकते हैं उनके लिए यह प्रयोग पूर्वाह्ण में भोजन करके और भोजन से पहले करना चाहिए, सायंकाल में तो इस के प्रयोग की आवश्यकता नहीं रहती है।

यदि चिकित्सक उपयुक्त समझता है तो सायङ्काल भी इसका प्रयोग करना चाहिये और उसी के परामर्श से यह प्रयोग तीन माह तक करना चाहिए।

**4. रसायनगुणान्वेषी तु पञ्चाष्टौ सप्त दश वा पिप्पलीर्मधुसर्पिषा समामेकां प्रयोजयेत्। किन्त्वत्र चिकित्सकस्य निर्देशस्तु परमावश्यकः**

रसायनगुण का अन्वेषण करने वाला अर्थात् चाहने वाला व्यक्ति 5,8,7 या 10 पिप्पलियों का शहद और घी के साथ 1 वर्ष तक प्रयोग करे, किंतु इसमें चिकित्सक का निर्देश तो परम आवश्यक है।

**5. बालाः युवकाः युवतयः स्त्रियः वृद्धाश्च सर्व एव नियमितरूपेण रात्रौ पिप्पलीमेकां गृहीत्वा पयसि प्रक्षिप्य सम्यक् समुत्क्वाथ्य पिप्पल्या सहितमेव तद्दुग्धं पिबेयुः, हेमन्ते मासपर्यन्त एवैषः प्रयोगः समीचीनः। विरम्य च दशदिवसानन्तरं पुनरस्याः प्रयोगः शिशिरेऽप्येवमेव मासपर्यन्तः करणीयः, निरापदो ह्येषः प्रयोगः श्लेष्मसम्बन्धिविकाराणामपहर्तापवारकश्च।**

बालक युवक युवतियां स्त्रियाँ और वृद्ध ये सभी नियमित रूप से रात्रि में एक पिप्पली को लेकर दूध में डालकर अच्छी प्रकार से उबालकर पिप्पली के साथही उस दूध को पीवें। हेमंत में एक माह तक ही इसका प्रयोग उपयुक्त है, विराम करके अर्थात् इसके प्रयोग को छोड़कर 10 दिवस के बाद उन्हें इसका प्रयोग शिशिर ऋतु में इसी प्रकार से 1 माह तक करना चाहिए। यह प्रयोग निरापद है, एवं श्लेष्मसम्बन्धी विकारों को दूर करने वाला और अपवारण करने वाला होता है, अर्थात् उन्हें होने से रोकता है।

**6. ये ह्यग्निमान्द्यग्रस्ताः जनाः सन्ति ते त्वेकां पिप्पलीं, पञ्च तुलसीपत्राणि, पञ्चैव च द्राक्षाफलान्येकीकृत्य कल्कं विधाय भोजनात् प्राक् प्रातःकाले सायङ्काले च गृह्णीयुः। पञ्चदशदिवसात्मक-स्त्वेषः प्रयोगोऽग्निवृद्धिङ्करोति।**

जो लोग अग्निमांद्य से पीड़ित हैं वे एक पिप्पली को, पांच तुलसी के पत्रों को एवं पांच ही मुनक्का को एक जगह लेकर उनका कल्क बनाकर अर्थात् चटनी की तरह पीसकर भोजन से पहले प्रातःकाल और सायंकाल इसे लें, पन्द्रह दिवस तक का यह प्रयोग अग्नि की वृद्धि करता है।

**7. वैद्यनिर्देशेन चतुष्षष्टिः प्रहरीत्यस्य योगस्य प्रयोगः सर्वान् श्लैष्मिकानामयान् निहन्ति।**

वैद्य के निर्देश से चतुष्षष्टिः प्रहरी इस नाम के योग का प्रयोग सभी श्लैष्मिक रोगों को नष्ट करता है।

**80, सेनापति हाउस के पीछे**
**प्रेमनगरम्, झोटवाड़ा, जयपुरम्**

# संस्कृतविश्वविद्यालयस्य दीक्षान्तसमारोहः सम्पन्नः

जयपुरस्थे जगद्गुरुरामानन्दाचार्यराजस्थानसंस्कृत-विश्वविद्यालयस्य परिसरे दिसम्बरमासस्य षोड़शदिनाङ्के तृतीयदीक्षान्तसमारोहः समायोजितः। समारोहे राजस्थान-राज्यपालमहोदयेन विश्वविद्यालयस्य कुलाधिपतिना श्रीमता कलराजमिश्रमहाभागेन प्रायशः 21 सहस्रम् उपाधयः, 30 स्वर्णपदकानि, 70 शोधोपाधयश्च प्रदत्ताः। प्रथमवारमेव चतुर्भ्यः विद्वद्भ्यः विद्यावाचस्पति (डी. लिट्.) इति उपाधयोऽपि मानदरूपेण प्रदत्ताः। एते विद्वांसः सन्ति-श्रीगुलाबकोठारी (प्रधानसम्पादकः राजस्थान-पत्रिकासमूहस्य), राष्ट्रपतिसम्मानितः संस्कृतविद्वान् देवर्षिः कलानाथशास्त्री, श्रीअनुरागपाठकः (कथावाचकः), श्रीकणसिंहः (जम्मूकश्मीरप्रान्तस्य पूर्वमहाराजः) दीक्षान्तकार्यक्रमे संस्कृतशिक्षामंत्रि-श्रीसुभाषगर्गः, संस्कृतशिक्षाशासनसचिवः श्रीमती मञ्जूराजपाल-महोदया, कुलपतिः डॉ. अनुलामौर्यमहोदया, कुलसचिवः श्रीमती ज्योतिभारद्वाजमहोदया अपि मञ्चासीनाः आसन् अथ च शिक्षकाः छात्राश्च उपस्थिताः आसन्। संविधानस्य प्रस्तावनायाम् उल्लिखितानां मूलकर्त्तव्यानां वाचनमपि कार्यक्रमे राज्यपालमहोदयेन कारितम्।

**- डॉ. स्नेहलता**

# ज्योतिषगोष्ठी सम्पन्ना

राजकीयमहाराजसंस्कृतमहाविद्यालयजयपुरे द्विदिवसीया ज्योतिषसंगोष्ठी दिसम्बरमासस्य 24-25 दिनाङ्कयोः सम्पन्ना। संगोष्ठ्याः विषयः आसीत् धर्म एवं ज्योतिष (सामाजिक लोकव्यवहार के संदर्भ में) संगोष्ठ्यां सम्पूर्णदेशतः समागतैः 150 विद्वद्भिः धर्मशास्त्र ज्योतिषयोः परस्परं साहचर्यं, वेदाङ्गत्वं, लोको-पकारकत्वं च प्रतिपादितम्।

कार्यक्रमस्य उद्घाटनं कृषिमंत्रिणा श्रीलालचन्द-कटारियामहोदयेन कृतम्, संस्कृत-विश्वविद्यालयस्य कुलपतिचरः प्रो. विनोदशास्त्री, सारस्वतातिथिः आसीत्, विशिष्टशासनसचिवः श्रीप्रदीपबोरडमहोदयः अध्यक्षतां कृतवान्। कार्यक्रमे निःशुल्कज्योतिषपरामर्शशिविरस्य अपि आयोजनं कृतम्। महाविद्यालयस्य प्राचार्यः प्रो. भास्करशर्मा उक्तवान् यत् संगोष्ठ्यां प्रस्तुतानां शोधपत्राणां प्रकाशनस्य लक्ष्यमस्ति। संगोष्ठ्याः संयोजिका प्रो. शालिनी सक्सेना समन्वयकः डॉ. आलोकशर्मा आस्ताम्।

**- प्रो. शालिनी सक्सेना**

# केन्द्रीयसंस्कृतविश्वविद्यालयाः

गतदिवसेषु भारतसर्वकारेण केन्द्रीयसंस्कृत-विश्वविद्यालयाधिनियमः लोकसभायां पारितः। अधिनियमानुसारं मानित-विश्वविद्यालयरूपेण सञ्चालिताः त्रयः विश्वविद्यालयाः सम्प्रति केन्द्रीयविश्व-विद्यालयरूपेण स्वत्वं विधास्यन्ति। पारम्परिकसंस्कृत-शिक्षायाः त्रीणि संस्कृतसंस्थानानि राष्ट्रियसंस्कृत-विद्यापीठम्, तिरुपतिः (1961), श्रीलालबहादुरशास्त्रि-राष्ट्रियसंस्कृतविद्यापीठम्, नवदेहली (1962) एवञ्च राष्ट्रियसंस्कृतसंस्थानं, नवदेहली (1970) अधुना केन्द्रीयसंस्कृतविश्वविद्यालयस्य स्वरूपं प्राप्नुवन्तः।

**- डॉ. सुधीरकुमारशर्मा**